No. ४३२२

Title शाण्डिल्य शत सूत्रीय भाष्यम्

Author शाण्डिल्यः । स्वप्नेश्वराचार्य

Extent ३८ पत्र Age

Subject मीमांसा

शाण्डिल्य भक्तिसूत्रीयभाष्यम्

४३२३

4323

F. = 38

शांडिल्यभक्तिमीमांसा

गी० ॥श्रीमहागणपतये नमः॥ श्रीमद्गुरुर्जयति॥ प्रपद्य परमं देवं श्रीस्वच्छन्देश्वरसूरिणा॥ शाण्डिल्यगोत्तस्
१ त्रीयं भाष्यमाभाष्यतेऽधुना॥ गोविंदचरणद्वन्द्वमधुनो महदद्भुतं॥ यत्पायिनो न मुह्यन्ति मुह्यन्ति यद
पायिनः॥ जीवानां ब्रह्मभावाप्तिर्मुक्तिरिति वक्ष्यते॥ जीवा ब्रह्मणोऽत्यन्तमभिन्ना इति॥ तेषां संसार
स्त्रिगुणान्तःकरणोपाधिकृतो न साहजिकः॥ स्फटिकस्येव जपादिसन्निधिकृतं लौहित्यादिकं॥ स चोपा
धिकत्वादेव न ज्ञानेन निवर्त्तनीयः॥ किंतु उपाध्युपधेययोरन्यतमहानेन तत्संबंधहानेन वा॥ न हि
निपुणतरदर्शनेनाप्युपाधियोगे स्फटिकलौहित्यभ्रमनिवृत्तिरस्ति॥ तथेह न सर्वसत्तास्फुरणात्म
नो हानिः संभवति॥ न च संबंधस्य तस्य तदुभयस्वरूपानतिरेकात्परिशेषादुपाधिहानादेव भ्र
मनिवृत्तिर्नात्मज्ञानात्॥ उपाधिहाने च कारणान्तरमन्वेष्टव्यं॥ तच्चेश्वरभक्तिरेवालौकिकत्वा राम· १
त् श्रुतिस्मृतिसिद्धा॥ तथा॥ तत्र सत्वं निर्मलत्वात्प्रकाशकमनामयं॥ सुखसङ्गेन वध्नाति ज्ञान
सङ्गेन चानघ॥ रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवं॥ तन्निवध्नाति कौन्तेय कर्मसङ्गेन

देहिनां॥ तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनां॥ प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारतेत्सु
पक्रम्य॥ मां च योऽव्यभिचारेण भक्तियोगेन सेवते॥ सगुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पत
इत्युपसंहरन् भगवानेवात्मभक्तेस्त्रिगुणात्मकान्तःकरणलयपूर्वकब्रह्मानंदावाप्तिलक्षण
ता मुक्तिहेतुमाह॥ न चात्मज्ञानवैयर्थ्यमभ्रधामलक्षालने न भक्त्यावुपयोगात्॥ न त्वपरोक्षान्तःक
रणरूपोपाधिधर्माध्यासनिरासमर्थं ज्ञानं॥ अत एव [illegible] गुणेभ्यश्च परं वेत्ति मद्भावं सोधि
गच्छति॥ ज्ञानसंछिन्नसंशयमित्याद्यावयमर्थः स्फुट एव न चाज्ञानकृतः संसारो येन ज्ञाना
न्निवृत्तिरपि वक्तुं शक्या प्रमाणाभावात्॥ रजतावयवादेः कारणत्वादज्ञानतः शुक्तितो रजतोत्प
त्त्यासम्भवाच्च॥ अपि च कुतस्तु खलु सोम्येदं स्यादसतः सज्जायेतेति श्रुतिः कार्यसत्तया का
रणसत्तां बोधयंती संसारस्य सत्त्वमेवाह॥ नितरां च सत्यसंकल्प इत्यादिना परमेश्वरसर्गस्य
नापि भगवान्बादरायणः कैचि . दपि सूत्रे संसारस्याज्ञानकल्पितत्वमुक्तवान्॥ प्रत्युत स्वप्न

शा०टि २

रति ला

2

स्वप्नदृष्टिनिराकरणेन जाग्रत्स्वप्नेः सत्यत्वं न च दृष्टान्तार्थं तत्॥ मानाभावात्। सुखादिधर्माणां
तु साहजित्वं नोपपद्यते। सुखादयो न साक्षादात्मविकाराः आत्मनि प्रतीयमानत्वात् गौरत्वादि
वत्॥ सुखाद्युपलब्धिः सकर्मिका क्रियात्वादित्यनुलाघवात्समवाये नैव करणजन्यत्वं युज्यते॥
श्रोत्रजन्यत्वमिव शब्दस्य सुखादयः करणसमवेता घ्राणादीन्द्रियग्राह्यगुणत्वात्॥ शब्दवदि
ति परमते॥ उभयमते स्पर्शेतरत्वे इन्द्रियग्राह्यगुणत्वात्॥ आत्मसिद्धिस्तु सर्वसत्ताप्रकाशनये
त ति॥ सर्वमेतद्द्वितीये तृतीये स्फुटीभविष्यति॥ तस्मात्पुरुषार्थहेतुत्वाद्धर्मस्येव भक्तेर्मीमांसाविधि
त्सयेदं सूत्रं॥ अथातो भक्तिजिज्ञासा॥१॥ अथेत्ययमधिकारार्थो नानन्तर्यार्थः॥ आनन्तर्यं हि न
स्वाध्यायाध्ययनस्य॥ आनिद्यो न्यधिकृतेर्वक्ष्यमाणत्वात्॥ नापि शमदमादिसंपत्त्यपेक्षः॥ मुमुक्षामा
त्रस्य भक्त्यधिकारत्वात्॥ यथा मंत्रवर्णः॥ यथा मंत्रवर्णः॥ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदां रा०म० २
श्च प्रहिणोति तस्मै॥ तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति॥ न च मंगला

र्थोपि॥ तदुच्चारणमात्रस्य मङ्गलत्वात्॥ तथा च मुमुक्षुणा भक्तिविचारः कर्त्तव्य इत्यर्थः॥ जिज्ञासया विचार
आक्षिप्यते॥ यद्यपि परमेश्वरानुरक्तिरूपाया भक्तेर्न धर्मवत् कृतिसाध्यत्वं न च ब्रह्मवज्ज्ञेयत्वं। तथापि
तस्याः स्वकारणपूर्वसुकृतेहिकभक्त्यादिसंपन्नाया अपि नेयं भक्तिर्नेयं भक्तिर्नेयं निःश्रेयसार्थोनेय
मुत्तमविषयेत्यादिकुतर्ककवलनेन निर्वृत्तिरपि भवति॥ यथा पत्योपपत्न्याः॥ तन्निरासमुखेनैतन्मीमां
साया भक्त्या ह्युपयोग इत्यतः शास्त्रेनोच्यते॥ कुतर्कनिरासोपेक्षणीयोऽत्रस्ताज्जिज्ञासेति॥ अतएव नाथ
योनिसहस्रेषु येषु येषु व्रजाम्यहं। तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि॥ इति तदविच्युतिप्रार्थ
नमपेक्षितत्वादिति॥ अतएव फलवत्त्वावगममपि विचारः फलवानेवेति॥ अयत्तस्यालौकिका
रमन्तरेण बुद्धेर्नारोहात्तद्विचारविषयत्वमतस्तल्लक्षणमुच्यते॥ सा परानुरक्तिरीश्वरे॥२॥ अ
त्र सा परेति लक्षणनिर्देशः॥ शेषं लक्षणं परेति गौणीं व्यावर्त्तयति॥ ईश्वर इति प्रकृताभिप्रायं॥ आरा
ध्यविषयकरागत्वमेव सा॥ इह तु परमेश्वरविषयकान्तःकरणवृत्तिविशेष एव भक्तिः॥ तद्वेशेषं

शांडि· २ चा लौकिकानुरागादौ सुग्रहं॥ यथोक्तं परमभक्तिमता प्रल्हादेन या प्रीतिरविवेकानां विषयेष्व पायि
नी॥ त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु॥ अत्र प्रीतिपदेन सुखनियतो राग एव लक्षितः॥ अन्य
थाप्रीतेः सुखरूपाया निर्विषयत्वेन विषयसप्तमी न स्यात्॥ तस्याः सुखज्ञानरूपत्वेपि तज्ज्ञानस्य सुखवि
षयत्वाद्विषयविषयत्वासंभवात्॥ तस्मादनुरक्तिरेव सविषयिणी लक्षिता॥ न चाविषयजन्याप्रीतिर
र्थी जनकसप्तम्या अननुशासनात्॥ किं च॥ अच्युतास्तु सदा त्वयीत्यत्र भक्तिरीश्वरविषयजन्याप्रीति
पदेन तदेकवाक्यतयात्रैवोच्यते॥ एवं प्रतिजन्म भक्तिप्रार्थनमिह तु विषयरागदृष्टान्तेन तस्याप्ये
वं सर्वथाप्यपरिहार्यत्वप्रार्थनमिति विशेषः॥ विषयजन्यप्रीतिरपि रागं विना न संभवतीति रा
त गावरूपकत्वं॥ तथा च पाञ्जलसूत्रे॥ २॥ सुखानुशायी राग इति॥ ७॥ तस्यैव वक्ष्यमाणलिङ्गपुष्या
पनाल्लाघवाच्च भक्तित्वं॥ ननु कचित्स्मरणस्य कचित्कीर्त्तनादेरनुगमात्॥ न च तज्ज्ञानस्य तत्त्वं॥ राम· ३
द्वेषादिमत्स्वापि तत्प्रसंगात्॥ नाप्याराध्यत्वेन ज्ञानं सा॥ एवं ज्ञाननमस्काराद्याराधनास्वननुगमात्॥ अ

पि च बलाद्भयाद्वा नमस्कार्यत्वादि ज्ञानवत्स्वपि भक्तोयमिति व्यवहारापत्तेः॥ अनुरागादिसहिताराध्य
त्वज्ञानमिति चेत्तर्ह्यनुराग एवास्तु॥ अत एव मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परं॥ कथयन्तश्च मां नि
त्यं तुष्यन्ति च रमन्ति च॥ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं॥ ददामि भक्तियोगं तं येन मामुपया
न्तीत्यादौ तद्गतचित्तप्राणादीनामपि परभक्तिफलं मुक्तिः स्मर्य्यते॥ अनुरागस्तु लक्षणान्त
र्गतः॥ किंतु॥ भगवन्महिमादिज्ञानादनुपश्चाज्जायमानत्वादनुरक्तिरित्युक्तं॥ ननु पित्रादिगोच
रानुरागस्यापि प्रकृतभक्तित्वं प्रसज्यते॥ जगत एव परमेश्वरात्मत्वात्॥ अथाविकाराद्विशिष्ट
एव तथात्वं वाच्यं॥ तथापि गोपीप्रभृतीनां प्रादुर्भावावच्छिन्नेश्वरभक्तावव्याप्तं॥ जीवोपाध्यवच्छिन्न
चेतनविषयिणी रक्तिरेवसेति॥ एवञ्च प्रादुर्भावावच्छिन्ने परिपूर्णे च रक्तिः संगृहीता भवति॥२॥
तत्संस्थस्यामृतत्वोपदेशात्॥३॥ तस्मिन्नीश्वरे संस्था भक्तिर्यस्य तथोक्तः॥ तस्यामृतत्वं फल
मुपदिश्यते ब्रह्मसंस्थोमृतत्वमेतीति॥ तस्मान्निःफलत्वगौणफलत्वन्यूनत्वादजिज्ञासा

शांडिल्य॰ ४

परिसुता भवतीति॥ ज्ञानमिति चेन्न द्विषतोपि ज्ञानस्य तदसंस्थितेः॥४॥ ननु ब्रह्मसंस्थाश
ब्देन ब्रह्मज्ञानमेवोच्यते न तद्भक्तिः॥ तथामृतत्वफलं तस्यैवेति चेद्दूषयन्नेष दोषः। संस्था
भक्तिरेव न तज्ज्ञानं द्विषतस्तज्ज्ञानवतोपि तत्संस्थत्वव्यवहाराभावात्॥ राजाद्यनुरक्ताः स्व
त्वमात्यादयस्तत्संस्था इति व्यपदिश्यन्ते न पुनः प्रतिपक्षभूपालाः॥ शब्दार्थनिर्णयो हि लोक
वद्देववेदेपीति॥ अत एव चिरकालिकोपाख्याने॥ विमृश्य तेन कालेन पत्न्याः संस्थाव्यतिक्रमं॥
सोब्रवीत्स भृशं तप्तो दुःखेनाश्रुप्रवर्तयन्नित्यनेन पतिभक्त्यतिक्रम उक्तः॥ तस्मात्संस्था भक्ति
रिति॥ एवं च तन्निष्ठस्य मोक्षोपदेशादिति बादरायणीयसूत्रस्याप्ययमेवार्थो ध्यवसेय इति॥
४॥ तयोपक्षयाच्च॥५॥ तया भक्त्या मुक्तिं प्रति ज्ञानमुपक्षीणं यस्मात्॥ चकार उक्तयुक्तिसमुच्च राम॰ ४
यार्थः॥ देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपीति॥ तथा प्रह्लादं प्रति भगवद्वाक्यं॥ यथा
ते निश्चलं चेतो मयि भक्तिसमन्वितं॥ तथा त्वं मत्प्रसादेन निर्वाणमधियास्यसीति स्थितं॥ ननु तमे

५

वविदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेत्यत्र वेदे ज्ञानफलं मुक्तिः श्रु[illegible] तात द्विरोधेन
स्मृतीनामन्यार्थत्वं स्यादिति चेत् न अत्रापि तथैवोपपत्स्यात्। तथाहि अतिमृत्युपदं न मुक्तौ रूढं॥
किंतु। यस्यां सत्यां मृत्योरतिक्रम इति व्युत्पत्त्यातदपेक्षायां यतो भक्तेर्मृत्य्वतिक्रम इति व्युत्पत्त्या ध
भक्तिमेवातिमृत्युपदेनाभिधत्ते अमुष्य पदविभक्त्यर्थापेक्षयाकारकविभक्त्यर्थस्य बलवत्त्वात्॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात्॥ भवामि न चिरात्पार्थ मय्यावेशितचेतसामित्यादिना भ
क्तितो मृत्यतिक्रमप्राप्तेर्मन्त्रश्च भवति॥ त्र्यम्बकं यजामहे सुगंधिं पुष्टिवर्द्धनं। उर्वारुकमि
व बंधनान्मृत्योर्मुक्षीय मामृतादिति॥ अत्र यजनं भक्तिः॥ तथैव नत्वकल्पनाख्यानात्। न चास्यां श्रुतौ
भक्तेरसन्निधानं मुक्तावपि तुल्यत्वात्॥ तस्मादनपायि[illegible] श्रुत्या ज्ञानस्यापक्षय एव प्रतीय
त इति। ननु तथापि भक्ते रागरूपत्वे किं कारणमित्य[illegible]पेक्षायामाह॥ ५॥ द्वेषप्रतिपक्षभावाद्रस
शब्दाच्च रागः॥ श्रीराम भक्तिः खलु राग एव भवितुमर्हति। कुतो द्वेषप्रतिवि[illegible]रोधित्वात्॥

लोके हि द्वेष्टायं भक्तोऽयमिति। मिथो विरुद्धधर्मवत्तिव्यवह्रियते॥ तत्र द्वेषविरोधी च राग एव प्र
सिद्धो न ज्ञानादिः। एवञ्च विप्लवे भगवति शिशुपालस्य द्वेषानुबन्धमभिधाय॥ अयं हि भगवा
न् कीर्त्तितः॥ संस्मृतश्च द्वेषानुबन्धेनाप्यखिलसुरासुरदुर्लभफलं प्रयच्छति किमुत सम्यग्भक्ति
मतामित्युक्तं॥ तथा चाभिस्मृतो विद्वेषादपि गोविन्दं दमघोषात्मजः स्मरन्॥ शिशुपालो ग
तः स्वर्गं किं पुनस्तत्परायण इति॥ तत्रापि द्वेषविरोधित्वेन भक्तेरभिधानात्॥ तथा च गीता
सु॥ मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः॥ तानहं द्विषतः क्रूरान् संसारेषु नराधमान्॥ क्षि
पाम्यजस्रमशुभानासुरीष्वेव योनिषु॥ आसुरीं योनिमापन्ना मूढा जन्मनि॥ मामप्राप्यैव कौ
न्तेय ततो यान्त्यधमां गतिमिति॥ अत्र तद्विरोधिनी च भक्तिरीश्वरविषयैवानुरक्तिरित्युच्य
ते॥ किञ्च॥ रसं ह्येवायं लब्ध्वानन्दी भवतीति॥ ब्रह्मानन्दाभिर्भाव मुक्ते ब्रह्मगोचरस्य हेतु।
तावगम्यते। रसश्च रागो रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्त्तत इत्यादौ प्रसिद्धः॥ अत्र रसो विषय

रस

घुत्कर्षस्यदृष्टत्वाच । किं च यो यस्मिन् भक्तस्तत्र तस्योदासीन्याभावे ऽवग
ते भक्तिस्तादृशानुवर्तनाद्यनुकूले द्वेषविरोधिरूपानुवर्तन ८

रागः ॥ वेद्यत एव च रामलक्ष्मणादीनां स्वर्गारोहणमुक्त्वा येपि तेषु भगवदंशेष्वनुरागिणः कोशा
लनगरजनपदस्थास्तेपितन्मनसस्तत्सलोकतामापुरितिसाक्षादेवानुरागशब्दो भक्तौ प्रयुक्त इति ॥
तस्मादपि न ज्ञानं ॥ किं तु । अनुरागरूपैव भक्तिर्निःश्रेयसफलेति । ननु द्वेषविरोधित्वं न रागत्वे लिङ्ग
मुदासीनत्वे ऽनैकान्त्यादिति चेत् । उच्यते । द्वेषकार्यानिवृत्तिस्तद्विरोधिनी प्रवृत्तिरिति । भवति
तु भक्तानां भजनीयानुवर्तनादौ प्रवृत्तिस्तद्विरोधिनां तदनुवर्तनादौ निवृत्तिः ॥ एवं च कार्यमुखे
न विरोधमभिप्रेत्य द्वेषविपक्षेत्युक्तं ॥ तथा प्रयोक्तव्यं ॥ भक्तिर्भजनीयगोचररागरूपा तदनुवर्तना
दिहेतुहितसाधनताधीभिन्नात्मविशेषगुणत्वात् ॥ यन्नैवं तन्नैवं तथा द्वेषः ॥ रागोत्कर्षेण तदनुवर्त
नोहेत्वात्मविशेषगुणत्वात् । इष्टसाधनताधीवदिति हितसाधनताधीत्वबाधसहकारेण परिशेषा
द्रागत्वसिद्धिः ॥ किमुत भक्तिमतामित्येतत्के मुक्तिकल्पा येन च द्वेषविरोधित्वेवद्रष्टव्यः ॥ मांहिपा
र्थ व्यपाश्रित्य येपि स्युः पापयोनयः ॥ किं पुनर्ब्राह्मणाः पुण्याः इत्यादौ ॥ एवमामात्मपरदेहेष्वित्यनेन

शा॰ ६ 6 द्वेषः संसारहेतुत्वात्तद्विरुद्धगुणो जीवोपाधिपरिहारेण परात्मगोचररागएव भक्तिरूपः संसारना
शहेतुः॥ एतदेवोक्तं। मामप्राप्यैवेति॥ चकारात्पुलकादिरागलिंगेनापि रागत्वं। प्रसिद्धं हि पुलकां
कितेन कथयन्ति॥ मय्यनुरागं कपोलेनेत्यादौ॥ भक्तेर्गुणान्तरत्वे तु पृथग्लिङ्गान्तकल्पने गौरवा
त्॥ स च रागः केषांचिदिष्टसाधनताज्ञानजन्योपि यागादिवदिच्छारूप एव॥ अस्माकं तु प्रीणाम्यनुर
ज्यामि नेच्छामीत्यादिप्रतीते रागः पृथगेव॥ द्वेषवत्॥ इच्छाया असिद्धमात्रविषयत्वाद्रागस्य सि
द्धासिद्धविषयत्वाच्च॥ प्रत्युत तस्येच्छात्वादिव्याप्यकल्पनागौरवाच्चेति दिक्॥ तस्माल्लल
क्षणासिद्धिरिति॥ ननु भक्तिः क्रियात्मिका सा च निःश्रेयसाय न क्षमते॥ न कर्मणा न प्रजया धने
न त्यागेनैकेन अमृतत्वमानशुरित्यादिश्रुतिभ्य इत्याशंकां परिहरन्नाह॥ ६॥ न क्रियाकृत्यनपे राम॰ ६
क्षणाज्ज्ञानवत्॥ ७॥ सा भक्तिर्न क्रियात्मिका भवितुमर्हति प्रयत्नानुविधानाभावात्॥ यत्प्रय
त्नानुविधायि तत्कर्मात्मकं यथा ज्ञानं तद्धि प्रमाणसंपत्त्यधीनं न पुरुषेण स्वेच्छया कर्तुमकर्तुम

न्यथा कर्तुं शक्यते॥ तथा भक्तिरपि न हि रागिणां प्रमदापुत्रादिविधायिनी रतिः॥ पुंव्यापारेण तथा
तथा भवति॥ किंतु॥ पूर्वसुकृतगौरवभक्त्यादिसाधनानुष्ठानाधीनेति॥७॥ अतएव फलानन्त्यम्॥
यतः सा नक्रियात्मिका अतएव तत्फलस्य निःश्रेयसस्यानंतत्वमुपपद्यते॥ अन्यथा तद्यथेह क
र्मजितो लोकः क्षीयते॥ एवमेवामुत्र जितो लोकः क्षीयत इत्यनेनामृतत्वस्यापि क्षयित्वं प्रसज्येते
ति॥८॥ तद्वतः प्रपत्तिशब्दाच्च न ज्ञानमितरप्रपत्तिवत्॥९॥ भवति भगवद्वाक्यं॥ बहूनां जन्मनामं
ते ज्ञानवान्मां प्रपद्यते॥ वासुदेवः सर्वमिति स महात्मा सुदुर्लभ॥ इति ज्ञानवतः प्रपत्तिरुक्ता भक्तेर्ज्ञानहेतु
त्वमुपपद्यते॥ इतरप्रपत्तिवदिति॥ यथा तदनन्तरं॥ कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेन्यदेवता इत्य
नेन देवान्तरप्रपत्तिनिन्दामुखेनैव प्रपत्तिः स्तूयते॥ तत्र देवताभक्तेरेव प्रपत्तिशब्देन कथनं न
तज्ज्ञानस्य॥ तस्या एव प्रपत्तेरुभयत्र प्रत्यभिज्ञानादिति। चकाराज्ज्ञानानन्तर्यं श्रवणमपि ज्ञानत्वा
भावनिदानं॥ यथा यो मामेवमसंमूढो जानाति पुरुषोत्तमं॥ स सर्वविद्भजति मां सर्वभावेन भारतेति॥ त

शांडि॰ थाभजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययं ॥ इति मत्वा भजन्ते मां बुधा भावसमन्विता इति च ॥
७ तस्मान्न ज्ञानात्मिकायाश्चापि रागत्वेनैव ज्ञानभेदः सिद्धस्तथापि भक्तिशब्दो ब्रह्मज्ञाने गौ
ण इति शंकानिरासार्थमेतत् ॥ इदं तु चिन्त्यते ॥ भगवद्गीतावाक्यानि न शब्दविधेयावेदत्व
प्रमाणं ॥ किं तु भारतस्मृतित्वेन ॥ तथा च कथं शब्दादिति निर्देशः ॥ अत्रैव केचिदनुमि
तशब्दादिति व्याचक्षते ॥ अदृष्टार्थकभगवद्वाक्यत्वमेव वेदत्वं ॥ तच्च गीतास्वप्यविशिष्टं ॥
अतएव भगवद्गीतासूपनिषत्स्विति दृश्यते ॥ केवलं त एव श्लोका व्यासेन विनिबद्धाः ॥ तथा च
पुरान्तरं ॥ गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः ॥ या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृ
ता ॥ न चैवं शूद्राणामश्रवणप्रसङ्गः ॥ भारतश्रवणाभ्यनुज्ञानेनैव तदुपपत्तेः प्रणवादिस्मृ राम॰
त्यादिवत् ॥ तद्विहाये इति चेन्न लक्षत्तापरिवृत्तेः ॥ तथा चोक्तमार्यैः तानेव वैदिकान्मंत्रान् भा ७
रतादिनिवेशितान् ॥ स्वाध्यायनियमं हित्वा लोकबुद्ध्या प्रयुंजत इति ॥ ९ ॥ ॥ इति श्री स्वप्नेश्वराचा

ध्ये विरचिते शतसूत्रीयभाष्ये प्रथमाध्यायस्य प्रथममान्हिकं ॥०॥ एवमभ्यस्ततत्त्वं प्रत्यपनन्यथासिद्ध
यां भक्तौ लक्षितायां ज्ञानयोग भक्तीनां मध्ये भक्तेः प्रधानभाव विवेकाय द्वितीयान्हिकस्यारम्भः॥
॥सामुख्येतरापेक्षितत्वात॥१॥ आन्हिकसमाप्तौ पुनः स्मरणाय सेति निर्देशः सा परा भक्ति मुख्या
प्रधानं॥ इतरे रात्मज्ञानयोगादिभिः स्वोपकार्यतया पेक्षितत्वादित्यर्थः॥ छान्दोग्ये॥ यो वै भूमा
तत्सुखमित्याद्युपक्रम्यान्नायते॥ आत्मैवेदं सर्वमिति॥ सवा एष एवं पश्यन्नेवं मन्वानः॥ एवं विजा
नन्नात्मरतिरात्मक्रीडा आत्ममिथुन आत्मानन्दः सस्वराड्भवति॥ तत्रात्मरतिरूपायाः परभक्तेः
पश्यन्निति दर्शनमत्यादिक्रमनिरासमुखेनाङ्गं भवति॥ यथा दंडी प्रेषमन्वाह प्राचीनावीती
होदयति॥ अभिजानन् जुहोति धनवान् सुखवान्नित्यादौ दण्डाद्यङ्गं तथा दर्शनमपि रत्तेरङ्गं॥ मनन
न विज्ञानयोरुक्रमप्रदर्शनार्थतया न्याय प्राप्तयोरनुवादः॥ एवमात्मक्रीडादेरतिनैयत्यादर्थप्राप्तो
नुवाद एव अन्यथा रत्युद्देशेन दर्शनादि विधौ दर्शनाद्युद्देशेन वा रत्यादि विधौ वाक्यानिभि

शां॰ड॰स्य॰ ८ ध्येरन्॥ तस्माच्छेषः परार्थत्वादिति न्यायाद्दर्शनमङ्गमिति॥ अत एव भगवान् मुनिरपि॥ यस्त्वेकान्तभक्तो
मोहं नित्यमात्मरति र्मुनिः॥ सर्वे भक्ता मम भक्तात्मा स्याच्चेत्परतमां गतिमित्येनेनात्मरतेः प्राधान्यमाहेति॥
॥ प्रकरणाच्च॥ प्रकरणं रतिरेवेति फलवत्त्वात्तस्यास्तत्प्रकरणस्थं दर्शनमङ्गं भवितुमर्हतीति॥ द
र्शनफलमिति चेन्नतेन व्यवधानात्॥ अथ दर्शनस्यैव फलं स्वाराज्यलक्षणमस्तु तत्त्वं॥ तथा च तस्यैव
प्रकरणमिति वैपरीत्यमिति चेन्न तेन तच्छब्देन व्यवधानात्॥ स स्वराड् भवतीति॥ अत्र तच्छब्देन सन्निकृष्टा
त्मरतिमानेवोपस्थाप्यते न विप्रकृष्टः॥ पश्यन्निति व्यवहितो पस्थिते नो कारणाभावात्प्रकरणमेव का
रणमिति चेन्न अन्योन्याश्रयात्। दृष्टत्वाच्च॥ दृष्टं हि लोके सौन्दर्यादि ज्ञानस्य तद्रूपाद्रूपानुर
क्तिहेतुत्वं॥ न तु रतेर्ज्ञानहेतुत्वमिति॥ दृष्टोपकारत्वात्॥ अप्यङ्गमवसीयते॥ दृष्टश्च प्रकृते निष्करुण ए
ण त्वात्महत्त्वाप्रियत्वादि ज्ञानं मनोमालिन्यकारणं भक्तेषु करुणा वकुलाच्याहते श्वर्याजनिरूपा शां॰भ॰ ८
श्रय आत्मेति ज्ञानामालिन्यनिवृत्तिस्ततः परा भक्तिरिति॥ अत एव गीयते॥ तद्बुद्धयस्तदात्मानस्त

न्निष्ठास्तत्परायणाः॥ गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषा इति॥ तथा यजुर्वेदेपि॥ धैर्यमायुर्विज्ञा
नं मनोदोषोपशान्तये इति॥ ॥अत एव तदभावाद्वल्लवीनां॥ यत एव ज्ञानं दृष्टोपकारमङ्गमत एव दृष्टोपकारं
निरस्यमानो मालिन्यादिवाधात्प्रधानभगवदनुरागमात्रेण॥ वल्लवीनां मुक्तिः स्मर्यते। यथा तच्चि
त्ता विपुलाह्लादाक्षीणपुण्या च यासती॥ तदप्राप्तिमहादुःखविलीनाशेषपातका॥ चिन्तयन्ती जग
त्सूतिं परब्रह्मस्वरूपिणं॥ निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका॥ अत्र सुखदुःखलिङ्गेना
नुरागोनुमीयते॥ तेन मुक्तिरिति वाक्यार्थः॥ द्वारवाधादनवहतकुण्डलीनापि कर्मणा॥ फलसि
द्धिरेवतासां रागान्मुक्तिः॥ तस्मादप्यवगम्यते ज्ञानमङ्गमेव॥ प्रधानत्वे तु तदभावे फलं न स्या
त्॥ चिन्ता च न ब्रह्मात्मैक्यज्ञानं॥ तत्कारणश्रवणमननाद्यसंभवात्॥ किं तु। अनुरागनियतानुस्मृ
तिरेव न चायमर्थवादः अपूर्वार्थत्वात्सान्निध्ये विध्यभावाच्चेति॥ नन्वयाजानातीति चेन्नाभिज्ञ
स्यासाहचर्यात्॥४॥ इदानीं श्रुतिविरोधेन प्रकरणस्थानलिङ्गवाधमाक्षिप्य समाधीयते॥ यथा

शांति. ९

श्रुतं॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः॥ ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरमिति॥
तदैक्या गार्हपत्यमुपतिष्ठत इति वत्कारकश्रुत्या बलीयस्या भक्तेर्ज्ञानहेतुकत्वमवसीयते॥ य
द्यपि दृष्टत्वादित्यनेन दृष्टोपकारे प्रत्यक्षगम्ये न श्रुतेरवकाशः॥ तथापि ब्रह्मविषयिण्या रतेर्ब्रह्म
विषयकज्ञानोपकार्यत्वं न प्रत्यक्षगम्यत्वं॥ किंतु। तद्रूपाद्रेरतो तथादर्शनेन ब्रह्मगोचरायाम
प्यनुमातव्यं॥ तथा च लिङ्गत्वे पर्यवसानादिति चेन्न दोषः॥ तथाहि। यदि केवलं जानातीति
9
वदेन्नत्वेवं॥ किंतु। अभिजानातीति। अभिज्ञा च पूर्वज्ञात ज्ञानमुच्यते। तथा च। भक्त्युपकारि पूर्व
ज्ञानं तत्फलरूपभक्तिप्रवर्त्तकमनंतरं यावत्तदार्ढ्यं भक्तौ चाभिज्ञप्तिभावेनापेक्षते॥ ब्रीह्यवह
ननेनावघातवदिति कार्यसाहचर्यार्थमुक्तं॥ ततो ज्ञानदार्ढ्येन भक्तिदार्ढ्ये सति विशत इति राम. ९
॥ तस्मान्नेयं श्रुतिः॥ किंतु। न्यायप्राप्तानुवाद इति॥ एतमेवार्थं स्फुटीकरोति। प्रागुक्तञ्च॥ भ
क्त्या मामित्यस्य पूर्वं ब्रह्मभूयाय कल्पत इत्यभिधाय॥ ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्ष

इसाहसचर्यं हि नामतत्फलायां भक्तौ घटते। इदं शादिदेवतास्वाराधितासु भवज्ञानफलाय भवति ६

ति॥ समः सर्वेषु मद्भक्तिं लभते परामित्युक्तं॥ तथाच ज्ञानब्रह्मणः सेतित ज्ज्ञानस्य पुनः प्रयोजनाभावाद्यु
क्तमनुवादत्वमिति॥ एतेन कल्पान्तरमप्युक्तः॥ ५॥ एतेन ज्ञानस्याङ्गत्वनिर्णयेन ज्ञानभक्त्योरत्र वि
कल्पपक्षोऽपि निराकृत इति मन्तव्यं॥ न ह्यङ्गाङ्गिनोरेकत्र विकल्पः संभवतीति अपिशब्दात्स
मुच्चयोऽपीति। देवभक्तिरितरस्मिन्न साहचर्यात्॥ क्वचिदेवं श्रूयते॥ यस्य देवे परा भक्तिर्यथा देवे
तथा गुरौ॥ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन इति॥ अत्र देवे भक्तिरीश्वरे तरस्मिन् देवे म
न्तव्या॥ कुतो गुरुभक्तिसाहचर्यात् नु साहचर्यमपि निर्णायकं॥ साहचर्याद्दुल्लकशब्दवद्दुक्तेयु
क्तेरुपष्टम्भकमेतत्॥ योगस्तूभयार्थमपेक्षणात्प्रयाजवत्॥ ६॥ योगः पुनर्ज्ञानार्थं भक्त्यर्थं च भवति॥
समाहितमनस्कतायाउभाभ्यामपेक्षणात्॥ ननु गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्स्यादिति न्या
यात्प्रधानाङ्गं योगः कथमङ्गाङ्गत्वमित्यत आह॥ प्रयाजवदिति। यथा प्रयाजो वाजपेयाद्यं
गं तदङ्गदीक्षणीयादेरप्यंगं॥ तद्वत्तदङ्गावबोधकप्रमाणविशेषात् केवलं ज्ञानार्थयोगा

शांडिल्य. नुष्ठानप्रसंगेन भक्तिमुपकरोतीति॥ एवं विषये वैराग्यमप्युभयार्थं मन्तव्यं॥ नन्वीश्वरप्रणि
१० धानात्विति कथं भक्तिप्राधान्यमित्यत आह॥ गौण्या तु समाधिसिद्धिः॥ तत्र प्रणिधाने गौण
भक्तिरेव न प्रधानं॥ तया समाधिसिद्धिरिति न सूत्रविरोधोपीति॥ भवति च वाक्यशेष
स्तत्रैव तज्जपस्तदनुभावनमिति॥ हेया रागत्वादिति चेन्नोत्तमास्पदत्वात्संगवत्॥ योगशास्त्रप्रस्ता
वादिदं सूत्रं योगशास्त्रोक्तरागत्वाविशेषाद्भक्तिरपि मुमुक्षुणा हेयैव॥ तथा च सूत्रं रागद्वे
षाभिनिवेशाः क्लेशा इति॥ एवं चेदुच्यते॥ नैवं वाच्यं॥ उत्तमास्पदत्वाद्भक्तेः॥ परमेश्वर
विषयत्वादिति यावत्॥ नहि रागत्वमात्रेण हेयत्वं॥ किंतु संसारानुबंधिरागत्वेनैव॥ यथा सं राम.
गत्वमात्रेण न हेयत्वं। किंतु असत्संगत्वेन तद्वत्॥ तथा चेश्वरभक्तिर्हेया रागत्वादित्यत्र सं १०
सारानुबंधित्वं चोपाधिः॥ न च सात्विका सा यजंते सात्विका देवानित्यादिना सात्विकीर्त्तना कृह
दिति॥ तदेवकर्मिज्ञानियोगिभ्य आधिक्यशब्दात्॥७॥ तदेव भजनं मुख्यं तस्माद्भक्तेर्वा मुख्य

त्वं॥ तत्सर्वं पथ्येव निश्चितं॥ यस्मादेवं श्रूयते॥ तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः॥ कर्मि
भ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥ योगिनामपि सर्वेषां मद्गतेनांतरात्मना॥ श्रद्धावान्भजते
यो मां स मे युक्ततमो मत इति॥ अत्र विशेषणानां तप आदीनामाधिक्यनिर्वंधनं विशेष्याणामाधि
क्यं क्रमादिति मन्तव्यं॥ न खल्वंगस्य मुख्यत्वादाधिक्यमुपपद्यते॥ तस्माद्भक्तिः प्रधानमिति॥
स्तुत्यर्थेनापि तदुत्पत्तिपरीहारार्थं पठति॥ प्रश्ननिरूपणाभ्यामाधिक्यसिद्धेः॥ अत्र कृत्स्नोपि द्वा
दशाध्याय उदाहरणं॥ एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते॥ सर्वत्रगमचिंत्यं च
कूटस्थमचलं ध्रुवं॥ संनियम्येंद्रियग्रामं सर्वत्र समबुद्धयः॥ ते प्राप्नुवन्ति मामेव सर्वभूत
हिते रताः॥ क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसां॥ अव्यक्ता हि गतिर्दुःखं देहवद्भिर
वाप्यते॥ अनन्येनैव योगेन मां ध्यायंत उपासते॥ तेषामहं समुद्धर्ता मृत्युसंसारसागरात्॥ भवा
मि न चिरात्पार्थ मय्यावेशितचेतसामिति निरूपणं ताभ्यां भक्तेः प्रधान्यसिद्धेः॥ नार्थवादत्व

शांड॰ मायात्ति प्रश्ननिरूपणं हि निर्णयार्थं प्रसिद्धं ॥ न स्कन्त्वर्थमिति केवलाङ्गानुष्ठानेन क्लेशाधिक्यमेवेति ॥
११ श्रद्धाप्रसंगाद्भक्तेः श्रद्धारूपत्वशंकामपि निराकरोति ॥ नैव श्रद्धा तु साधारण्यात् ॥ ९ ॥ भक्तिर्न स
र्वथा श्रद्धात्वेन शंकनीया श्रद्धायाः कर्ममात्राङ्गत्वात् ॥ न चैवमीश्वरभक्तिरिति ॥ तस्यां तत्त्वे चान
वस्थानात् ॥ श्रद्धावान् भजते यो मां स मे युक्ततमो मत इति हि श्रुतं ॥ तत्र भक्तौ श्रद्धारूपायां श्र
द्धाङ्गत्वे प्रतीते ऽनवस्थाप्रसङ्गात् । श्रद्धाभक्तिसमन्वित इति भेदेन कथनाच्च ॥ ब्रह्मकाण्डं तु भक्तौ कां
तस्यानुज्ञानाय सामान्यात् ॥ १० ॥ ज्ञानाद्याधान्ये ज्ञानकाण्डमित्युत्तरकाण्डे प्रसिद्धिर्न स्यादिति मन्वा
नं प्रत्युच्यते ॥ भक्त्यर्थं ज्ञानकाण्डं श्रूयते न ज्ञानार्थं ॥ ज्ञानार्थज्ञापनस्य काण्डद्वयसामर्थ्यात् ॥ अ
न्यथा धर्मज्ञानार्थं पूर्वकाण्डमाम्नातमपि ज्ञानकाण्डं स्यात् ॥ न च ज्ञाने विधिः सम्भवति येन तत्प्रा राम॰
धान्यादपि ज्ञानकाण्डं भवेदिति ॥ तस्माज्ज्ञानकाण्डमिति भ्रमः ॥ किंतु ब्रह्मकाण्डमिति ॥ अत एवाथा ११
तो ब्रह्मजिज्ञासेति सूत्रितं तत्तु भक्त्यर्थत्वाद्भक्तिकाण्डमिति ॥ ॥ इति श्रीस्वप्नेश्वराचार्यविरचि

तेशातसूत्रीयभाष्ये प्रथमाध्यायस्य द्वितीयमाह्निकं ॥२॥ समाप्तश्च प्रथमाध्यायः ॥१॥ तस्या भक्तेः साक्षा
त्प्रयत्नानिष्पाद्यत्वेन निष्पत्त्यर्थं साधनान्तरापेक्षा तत्रान्तरङ्गसाधनान्यपरभक्तिप्रभृतीनि ते
षां विवेकाय द्वितीयारम्भः ॥ बुद्धिहेतुप्रवृत्तिराविशुद्धेरवघातवत् ॥ बुद्धिर्ब्रह्मप्रमितिः सा यद्य
पि कृत्यनिष्पाद्या तथापि तद्धेतूनां श्रवणमनननिदिध्यासनादीनां तन्निष्पत्तयेनुष्ठानमावश्य
कं ॥ तत्किं सकृत्कृते कृतः शास्त्रार्थ इति न्यायात्सकृदेव वर्त्तते । उत यावद्भक्तिदार्ढ्यं ॥ तत्रोच्यते ॥ भ
क्तिपरिशुद्धिपर्य्यन्तं तत्प्रवृत्तिरावश्यकी ॥ यथा व्रीहीनवहन्तीत्यनेन विहितव्रीह्यवघातस्य या
वद्वैतुष्यमनुष्ठानं शास्त्रार्थः ॥ तथा दृष्टोपकारकत्वान्मनोमालिन्यनिरासपर्य्यन्तं ज्ञानाद्यनुष्ठानेय
त्तनीयमिति ॥ तेषामङ्गानां यान्यङ्गानि तदनुष्ठानं तु न प्रसज्यत इत्यत्रोत्तरं ॥ तदङ्गानां गुर्वनुगम च॥ अंगा॥
नवेदाविरोधितर्कानुसंधानशमदमादीनामप्यनुष्ठानं युक्तं न ह्यङ्गविकल्प्यान्यंगानि सेन्यसे
नापतिवत्प्रधानोपकाराय क्षमन्ते ॥ इदानीं बुद्धिविषयपरिशुद्धिश्चिन्त्यते ॥ तामैश्वर्य्यप

प

शां॰डि॰ दां काश्यपः परत्वात्॥३॥ तां बुद्धिं परमैश्वर्यादिमद्विषयिणीं निःश्रेयसफलां काश्यप आचार्यो मन्य
१२ ते॥ कुतो जीवात्मभ्यः परत्वात्॥ तैः स्वज्ञानपरज्ञानस्यापेक्षितत्वात्॥ एतन्मते जीवब्रह्मणोरत्यन्त
भेद इति। आत्मैकपरां बादरायणः॥ बादरायण आचार्यः पुनः शुद्धात्मविषयिणीमेव मनुते। तथा
च सूत्रं॥ आत्मेति तूपगच्छन्ति ग्राहयन्ति चेत्॥ एतन्मते जीवब्रह्मत्वकल्पना या मिथ्यात्वाच्छुद्
12 चिदात्ममात्रबुद्धेस्तत्त्वज्ञानत्वात्तदेव मुक्तिफलायेति॥ उभयपरां शाण्डिल्यः शब्दोपपत्तिभ्यां॥५॥
शाण्डिल्य आचार्यस्तूभयपरामेव मन्यते॥ कुतः शब्दो हि वेदस्तथा ब्रूते॥ सर्वं खल्विदं ब्रह्म त
ज्जलानिति शान्त उपासीतेत्युपक्रम्य एष म आत्मान्तर्हृदय एतद्ब्रह्मैतमितः प्रेत्याभिसंभविता
स्मीति॥ यस्य स्यादद्धा न विचि॰कित्साऽस्तीति॥ अस्मात्तु शाण्डिल्यः शाण्डिल्य इति विचिकित्स्यत उ
भयविषयविद्या ब्रह्माभिप्रायलक्षणप्रेमभक्तिजन्म ब्रह्मसंभवफलत्वमाह॥ वरप्रावाहनिरका राम॰
ते मयेत्ति वत्सर्वं पूर्वं शाण्डिल्यार्थत्वान्नानित्यानित्यसंयोगविरोधः॥ वस्तुतो वेदस्य भगवत्कर्तृक १२

अ.५:

त्वमेव॥तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायतेत्यादि
श्रुतिभ्य उपपत्तिश्च भवति॥ ब्रह्म खलु परमैश्वर्यवत्तया श्रुतं जीवरूपतया च॥ तथा च श्रुतिः यतो
वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व इति॥ तथा म
मैवांशो जीवलोके जीवभूतः सनातन इति॥ तत्र किं कस्योपमर्दकं॥ तस्मात्तत्त्वमस्यादिवाक्येनोभयबो
धनमेवोपपत्तिरिति॥ वैषम्यादसिद्धमिति चेन्नाभिज्ञानवद्वैशिष्ट्यात्॥ ६॥ नन्वयं भो विष
यत्वमेव न सिध्यति॥ वैषम्यात्॥ विषमं हि जगत्कर्तृत्वादिविशिष्टं तदकर्तृत्वादिवैशिष्ट्यज्ञानमि
ति चेत्। न यतः सोऽयं देवदत्तः सोऽहमित्यादिप्रत्यभिज्ञावदेकविशिष्टे परवैशिष्ट्यमन्तरेण सामा
नाधिकरण्यस्वरूपाभेदांशागोचरकत्वेन तदुपपत्तेः विशिष्टवैशिष्ट्यबुद्धेरौत्सर्गिकत्वात्॥ अथ
विशेष्यमात्रलक्षणया स्वरूपभेदोपस्थितिरिति मतं तन्न॥ लक्षणाया बाधस्य बोधकस्य जघन्यत्वा
त्॥ लक्ष्योपस्थितौ तदवच्छेदकोपस्थितिहेतुसत्त्वाच्च॥ अन्यथा कदाचिदवच्छेदकमन्तरेणापि शाब्द

शां. १३

13

स्मृतिर्भवेदित्यास्तां तावत्॥ न चाक्लिष्टः परः स्यादनन्तरं विशेषात्॥ न चैवं सति जीवोपाधि क्ले
शादिमत्त्वमपि परमेश्वरे प्रसज्येतेति वक्तुं शक्यं उत्क्रामेद् बुध्यनन्तरं क्लेशादेरात्मास
म्बन्धित्वरूपविशेषनिर्णयादिति॥ ऐश्वर्यं तथात्वेऽपि न स्वाभाव्यात्॥ नन्वेवं क्लेशादि
वदैश्वर्यमपि कर्तृत्वादिलक्षणं परमेश्वरस्य बाध्यते वैभवं लात्मनि प्रतीतत्वात् क्लेशादिवदि
ति चेन्न॥ कर्तृत्वादेः परमेश्वरस्य स्वाभाव्यात्॥ न हि वह्नेरौष्ण्यं स्वाभाव्यमन्यथा भवति॥ तस्मादस्वा
भाविकत्वमुपाधिरिति॥ अत एव दर्पणादिप्रतिफलितबिंबे भास्वति मालिन्यादितिबाधेऽपि
वक्त्रप्रकाशादिस्वभावस्याबाध एवेति॥ ननु परमेश्वरस्य सत्यमैश्वर्यं जीवानां तु कथमागं
तुकः क्लेशादिरित्यत्र हेतुमाह॥ अप्रतिषिद्धं परमेश्वर्यं तज्ज्ञावाप्त्यै नैवमितरेषां॥ ७॥ न हि राम. १३
कस्यामपि श्रुतौ परमेश्वर्यं प्रतिषिद्धमस्ति येन प्रतिपन्नमपि बाधितं स्यात्॥ प्रत्युत सत्यसंकल्प
इत्यादिनात्तस्य स्वाभाव्यमवगम्यते॥ न च जीवस्यैव प्रतीतधर्मत्यागकारणमस्ति॥ सदैवेश्वरत्वा

त्सदैवमुक्तत्वात्तदितरेषांतुजीवानांनैवंस्वाभाविकः क्लेशादिः कस्मात्तन्मोवात्॥ श्रूयतेहिपरंज्योतिरूपसं
पद्यतेस्वेनरूपेणाभिनिष्पद्यत इत्यादिभिः॥ नच्च स्वभावत्वे नोपपद्यते॥ उपपद्येनापियदिपरस्यर
क्लेशादिस्वभावः स्यान्नचैवं॥ तस्माद्ब्रह्मस्वभावलक्षणमुक्त्यन्यथानुपपत्त्यापिजीवानामौपाधिकी
संसृतिरिति। यद्यपिपरस्यापिमायोपाधिकमैश्वर्यंश्वर्यं तथापितदुपाधेः कदापिनात्यन्तलयः॥ जीवो
पाधिबुद्धीनांतुपरभक्तौ सत्यामत्यन्तलयएव। नहिभगवतोमायाशक्तिः क्षीयते॥ जीवानामनन्त
त्वेन नत्संसारतदुज्जनाद्यर्थंभगवतः प्रवृत्तेरावश्यकत्वादिति॥ एवं तदाध्यायतीवलेलायतीं
वेत्यादिश्रुतिरथात आदेशोनेतिनेत्यादिश्रुतिश्चजीवविषयिण्येवेति॥ सर्वोमन्तेकिमितिचे
दनैवंबुद्ध्यानंत्यात्। ६॥ अथक्रमशोमुक्तावपियदासर्वबुद्धीनांविलयस्तदापरोपाधेःस्थि
तौ प्रयोजनाभावात्तस्याप्यत्यन्तलये किंकृतमैश्वर्यंस्वभाव इतिचेन्नैवंभवति। जीवोपाधिबुद्धी
ना[illegible]मनन्तत्वात्तादृशकालएवनास्तीतियुक्तंभाविकमैश्वर्यं॥ नचप्रागभावाःप्रतियोगिजनकास्त

शां॰टि॰ त्वादित्येतावतापि कालस्तथाभूतः सिध्यति॥ अथैकदा सर्वे जनितप्रतियोगिन इति चेन्न अप्र
१४ योजकत्वात्॥ सर्वकार्यशून्यकालानुमानं त्वत्यन्ततर्कशून्यं॥ अन्यथा सर्वे प्रागभावाः कदा
चिदजनितप्रतियोगिन इत्यनुमानेन ध्वंसानधिकरणः प्राक्कालः सिध्येत॥ अथाहमेव मुक्तः
स्यामिति धिया मुक्तावयत्नप्रसंग इति चेत्॥ फलानिश्चयेप्युपायतानिश्चयेन तत्साधने प्रवृत्ति
रस्तु। प्रस्तुतसर्वमुक्तिनिश्चये तत एवाप्रवृत्तिप्रसङ्ग इति॥ उपादानकर्तृत्वलक्षणमैश्व
र्यं यदि परस्य सांहजिकं तदाविकारित्वमेव प्राप्तं सदादिवृद्धिस्सतत उच्यते॥ प्रकृत्यन्तरात्वा
द्वैकार्ये चित्सत्वेनानुवर्तनात्॥ प्रकृतिर्नाम जडकार्यमात्रोपादानं॥ सा विकार्येन तु
ब्रह्म॥ स्फुरणरूपसत्तया प्रकृत्यनुगत्वे न च परस्य कर्तृत्वादि॥ न च प्रकृतिरेव सत्तेति वक्तुं
शक्यते जीवानामसत्वप्रसङ्गात्॥ तेषां प्रकृतेः परत्वात्॥ तस्मात्प्रकृतिलक्षणां मायाश राम॰
क्तिमनन्तशालीकृत्य परस्य कर्तृत्वादिस्वाभाव्यमिति न विकार्यता॥ न हि मायया स्वजन्माया १४

वीमायाकार्य्यं भवतीति। यद्यपि तादात्म्येन कार्य्यमेवविकार्य्यत्वं॥ तच्च वर्त्तत एव तथापि क्षीरादिवन्न स्वरूपपरिवर्त्तनेन विकारित्वं॥ यद्वा स्वाधिकारणकविकाराहेतुत्वेन घटं प्रति दण्डादिवद् विकार्य्यत्वमस्ति॥ तदेवोक्तं प्रकृत्यंतरालादिति॥ अनुमेयोपादानत्वे मायाया मेव जगत्प्रतिष्ठितं तर्हि कथं तस्मान्प्रतिष्ठितमिति श्रुत्या जगतो ब्रह्म प्रतिष्ठा प्रतिपाद्यत इत्यत उत्तरं॥ तत्प्रतिष्ठा गृहपीठवत्॥ ११॥ तस्मिन् ब्रह्मण्यपि विकारप्रतिष्ठानमविरुद्धं॥ गृहपीठवत् यथा गृहमध्यस्थपीठे स्थितोपि गृहे तिष्ठतिपीठे तिष्ठतीति व्यपदिश्यते तद्वत्॥ ननु तर्हि प्रकृत्यैव ब्रह्मान्यथासिद्धमस्त्वित्युच्यते॥ मिथोपेक्षणादुभयं॥ १२॥ ब्रह्मप्रकृतिश्चोभयमपि कारणं परस्परमचेतनचेतनाभ्यां स्वज्ञानाय स्वशक्ति विषयायचापेक्षितत्वात्किंकस्यापेक्षकमिति॥ इदानीं स्वशास्त्रे व्यवहार लाघवाय पदार्थसंकलनमुच्यते॥ चेत्याचितोर्न तृतीयं॥ १२॥ चेत्या प्रकृतिः चिद् ब्रह्म तयोर्न तृतीयमर्थान्तरमत्रेत्यर्थः॥ ननु तृतीयस्यासिद्ध्यसिद्धिभ्यां चोद्यत इति

७ वेधं ॥१४॥ वेधंप्रधानंनानन्तं

शां॰उ॰ १५ चेत्॥अयमर्थः ब्रह्मभिन्नेज्ञातृत्वंप्रकृतिभिन्नेचज्ञेयत्वं निषिध्यते इति॥ अथप्रकृतिपुरुषयोरसं
वंधेकासर्वकार्य्यविलोपःसम्बन्धेतुसएवतृतीयइत्यतआह।युक्तोचसंपरायात्॥१३॥मिथ्यइत्य
नुवर्त्तते॥तौप्रकृतिपुरुषौवुद्धिस्थौपरस्परंप्रतिसंवंधरूपौनत्वागंतुकःकश्चित्।कस्मात्सं
परायात्॥अनादित्वादेव॥तथाचगीतासु।प्रकृतिंपुरुषंचैवविध्यनादीउभावपि॥अनादिरेव
सम्बन्धान्तरमस्त्विति चेत्॥नजडाजडविकल्पेनतयोरनन्यत्वादिति।ननुप्रकृतिपुरुषयोर्वमाया
रूपत्वात्तस्यामायांतुप्रकृतिंविद्यान्मायिनंचमहेश्वरमित्यादिश्रुतिभ्यः।तथाच।कथंवेधंप
दार्थइत्यतआह॥शक्तित्वान्नानन्तंनमिथ्याभवितुमर्हति॥कुतःशक्तित्वादेव।नहिमायावीमाया
शक्तिविनागंतुकसृष्टयेप्रभवति किंचकुतस्तुखलुसोम्यैवंस्यादसतःसज्जा।येतेतिश्रुतिःका
र्य्यसत्वेनकारणसत्तावदन्तीसर्वसत्तामाह।नान्ततत्वं अशक्तितुसर्वदाभागवतीसृष्टिःसादृश्य राम
सहकार्य्यपेक्षाचेत्न॥सृष्टित्वान्मायिकसृष्टिवदिति।नचादृष्टादितिरर्थान्तरं।एकशास्य १५

15

पेक्षायां लाघवाद्भोगतत्साधने तरेषु दृष्टहेतुतायां मानाभावाच्च। एवं सर्वकार्येषु मिथो व्यभि
चारो दैकनित्यसहकारिशक्तिसिद्धिस्तदवान्तरानेककल्पनं तु फलमुखमिति नगोरवायेति
॥ विस्तारोस्यत्वत्तीयइति॥ गताप्रासङ्गिकी चर्चा प्रकृतिमनुसरति॥ तत्परिशुद्धिश्चगम्यालोक
वल्लिंगेभ्यः। १५॥ यद्यपि ज्ञानामीच्छामीत्यादिवदहं भजेहमनुरज्य इत्येवमादिना प्रत्यक्षगम्यै
व भक्तिस्तथापि तत्स्यादृढतरसंस्कारवैशिष्ट्यलक्षणा परिशुद्धिर्न प्रत्यक्षतो निर्णेतुं शक्य
ते ज्ञानप्रामाण्यवत्॥ तस्मात्तन्निर्णयो लोकवज्ज्ञाततल्लिंगेभ्य एव॥ यथा लोकेनुरागतारतम्यं नत्क
थादावश्रुपुलकादिविकारैरनुमीयते तद्वदिति॥ न केवलं लोकवल्लिंगानि भवन्ति महर्षी
णां स्मृतिभ्योपि। तानि लिंगानि वाकुल्येन लक्ष्यन्त इत्याह॥ संवदु मानप्रीति विरहेतर विचि
कित्सामहिमख्यातितदर्थप्राणस्थानतदीयता सर्वतद्भावाप्रातिकुल्यादीनि च स्मरणे
भ्यो वाहुल्यात्। १६॥ यथार्जुनेन सासंमानं॥ प्रत्युत्थानं तु कृष्णस्य सर्वावस्थो धनञ्जयः॥ नलं

ग्रां उत्स. घ्यपति धर्मात्मा भक्त्या प्रेम्णा च सर्वदा॥ वकुप्रीतिर्यथेक्ष्वाकोः॥ पक्षपातेन तन्नाम्नि म्लेचो
१६ पक्षे च तादृशि॥ वभार मेघे वर्णे च वकुमानमत्तिं न्टपः॥ प्रीतिर्यथा विदुरस्य यानः प्रीतिः पुध्क
राक्षस्त्व दर्शन समुत्कवा॥ साकिमाख्यायते तुभ्यमन्तरात्मासि देहिनां॥ विरहो यथा गोपी
नां॥ गुरूणामग्रतो वक्तुं किं ब्रवीमि न नः क्षमं॥ गुरवः किं करिष्यंति दग्धानां विरहाग्निना
॥इतराविचिकित्सा यथा॥ श्वेतद्वीपनिवासिनां नारददर्शनेऽपि विघ्नबुद्धिः॥ ॥यथा
चोपमन्यो॥ अपि कीटः पतङ्गो वा भवेयं शङ्कराज्ञया। न तु शक्र त्वया दत्तं त्रैलोक्यमपि कां
मये॥ महिमवन्धो श्रद्धायमस्य यथा॥ नरके पच्यमानस्तु यमेन परिभाषितः॥ किं त्वया नार्चि
तो देवः केशवः क्लेशनाशनः॥ स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले राम.
॥परिहर मधुसूदनप्रपन्नान् प्रभुरहमन्यनृणां न वैष्णवानां॥ तदर्थप्राणस्थितिर्यथा हनुमतः॥ १६
तेनैव चोक्तं॥ यावद्रामकथा लोके तावत्स्यानं विभर्म्यहमिति॥ अथवा कृतकृत्यानामपि नारदा

रा

दीनांतरे काराधनार्थं प्राण धारणं॥ अतएव श्रुतिः॥ यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवा
दिनश्चेति॥ तदीयताभावस्तु वस्तोरुपरिचरस्य। आत्मा राज्यं धनं चैव कलत्रं वाहनं तथा॥ एतद्भागव
तं सर्वमिति तत्प्रेक्षितं सदेति॥ सर्वभूतेषु तद्भावो यथा प्रल्हादस्य प्रसिद्धः॥ उक्तं च तेनैव॥ तस्मा
त्सर्वेषु भूतेषु भक्तिरव्यभिचारिणी। कर्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयं हरिमिति॥ तस्मिन्प्रा
तिकूल्यं यथाहन्नुमागतेपि भगवति भीष्मे॥ तेनोक्तं। एह्येहि देवेश जगन्निवासन मोस्तुते शार्ङ्ग
गदासिपाणे॥ प्रसह्य मां पातय लोकनाथ रथाङ्गकोट्याद्भुतसौख्य संख्ये॥ आदिशब्दादुद्धवाक्रू
रादिचेष्टितान्यपि दृष्टव्यानि॥ यद्यपि द्वेषविपक्षभावादित्यत्रेदमुक्तं तथापि तत्र रागालिङ्गत्वे
न वस्तुभक्तिपरिशुद्धिलिंगतयेति विशेष इति। ननु स्वामिन्यनुरागिणां तदनुग्रहतारतम्यवतस्त
द्वेषेर्ष्यादयो भवन्ति ते ऽपि किं लिङ्गानि नेत्याह॥ द्वेषादयस्तु नैवं॥ ७॥ तदसंभवाद्देव यथोक्तं
भगवता द्वैपायनेन॥ न क्रोधो न च मात्सर्य्यं न लोभो नाशुभा मतिः॥ भवंति कृतपुण्यानां भक्तानां

शां उ० पुरुषोत्तम इति॥ शिशुपालस्य तु द्वेषात्स्मरणं ततः परभक्तिः ततो मुक्तिरित्येव क्रम इति॥ अथ प्रा
१७ यशो भगवदवतारविषया एव तानि लिंगानि समर्थ्यन्ते ब्रह्मज्ञानजत्वात्पूर्णविषयत्ता च भ
क्तेः पुनरुक्तिसंशये सिद्धान्तमाह॥ ॥ तद्वाक्यशेषात्प्रादुर्भावेष्वपि सा॥ १८॥ सापराभक्तिः प्रादुर्भा
वात्मविषयापि भवति कस्मादिदं ज्ञायते वाक्यशेषात्॥ देवान्देवयजो यान्ति मद्भक्ता यान्ति
मामपीति प्रतिज्ञातार्थस्थिरीकरणाय देव तार्थस्थिरीकरणाय देवतान्तरभक्तिनिन्दायां
वाक्यशेषो भवति॥ यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति॥ तस्य तस्याचलां श्रद्धां तामेव वि
दधाम्यहमिति॥ तत्र यो यो यां यां भक्त इत्येतावदुक्तार्थसिद्धेस्तनुपर्य्यन्तनिर्देशाद्भक्तेस्तन्वात्म
णं विषयता सर्य्यमुन्नीयते॥ प्रकरणञ्च भक्तेरेवेति॥ जन्म कर्म्म विदश्चाजन्मने शब्दात्॥ १९॥ ज
न्मशरीरादिनामूर्तवेदप्रकाशयनदेत्यभक्तैर्नैके दर्शनादिकार्य्याय भगवतः शरीरं विग्रहः॥ कर्म राम
च वेदप्रगायनादि तनुत्ववेदिनो जन्माभाव फलाय शब्दो भवति। यथा जन्म कर्मं च मे दिव्यमेवं १७

योवेत्तितत्वतः॥त्यक्त्वादेहंपुनर्जन्मनैतिमामेतिसोर्ज्जुनेति॥नचजन्मकर्मवेदनस्यसाक्षादस्मत्तत्व
फलमुपपद्यते।किंतु।उद्धतमनोमालिन्यनिवृत्तिद्वारातद्विशिष्टपरमेश्वरगोचरंनक्लिंजनयि
त्वाजन्माभावफलायभवति॥तस्मात्स्वादुर्भावभावापन्नगोचरत्वंपरभक्तेःशब्दादेवगम्यते॥
॥तच्चदिव्यंस्वशक्तिमात्रोद्भवात्॥२०॥जन्मकर्मचमेदिव्यमित्यत्रकिंदिव्यत्वंनधर्मजत्वं
धर्मयोगाभावात्तस्मिन्नदृष्टासिद्धेः॥नापिदिविभवत्वंभूर्लोकजन्मन्यव्याप्तेः॥किंतु।जीववत्त
शरीरंचेन्नभूतोपादानकत्वं॥अपितुस्वमायाशक्तिकृतत्वं॥अतएवमोक्षधर्मेनारदंप्रतिभ
गवद्वाक्यं॥मायेषाहिमयासृष्टायन्मांपश्यसिनारदेति तथागीयते॥अजोपिसन्नव्ययात्माभू
य तानामीश्वरोपिसन्॥प्रकृतिंस्वामधिष्ठासंभवाम्युगेयुगेइति॥नचाभौतिकत्वेशरीरत्व
व्याघातोभोगायतने भौतिकत्वनियमात्॥अथभोगायतनत्वमेवशरीरत्वमितिचेत्र।न
चेष्टा।श्रशयस्यतत्वेलाघवात्॥चेष्टात्वंतुक्रियागतोजातिविशेषः।नचक्रियैवचेष्टाम

शां॰टी॰ तच्छरीरक्रियायां तद्व्यवहारापत्तेः॥ नापि साक्षात्प्रयत्नजक्रियात्वमेव चेष्टात्वं। घटादावपि चेष्ट
१८ त इति व्यवहृतिप्रसङ्गात्॥ सर्वक्रियायाः साक्षात्परमेश्वरप्रयत्नजन्यत्वात्॥ एवं च परमेश्वरशरी
रवो धावमानेन तच्छरीरे चेष्टासिद्धेरित्यास्तां तावदिति॥ न च तत्त्वाधिक्यं तच्छरीरस्य ब्रह्माण्डानु
पादानतया घटादिवदनित्यत्वभावात्॥ इन्द्रियाप्रकृतित्वाच्च॥ ननु स्वतः प्रयोजनाभावे कथं प्रवर्त्तत इत
18 इत्यपेक्षायामाह॥ मुख्यं तस्य ब्रह्माण्डानुपादानतया घटादिवदनित्यत्वभावात्॥ इन्द्रियाप्रकृतित्वा
च्च॥ ननु स्वतः प्रयोजनाभावे कथं प्रवर्त्तत इत्यपेक्षायामाह माह॥ मुख्यं तस्य हि कारुण्यं॥ २१॥ लोके
हि निरुपाधिदुःखप्रहाणाय प्रवृत्तेषु कारुणिकव्यपदेशः॥ न चासौ मुख्यः कृपाजन्यदुःखहाना
य पुण्यार्थं चाप्यन्यतः प्रवृत्तेर्न निरुपाधित्वं सम्भवति॥ नापि परदुःखप्रहाणिमात्र प्रवृत्ते धनाद्यु राम॰
पाधियुक्ते तद्व्यवहृतेः॥ किन्तु निरुपाधिपरक्लेशनाशिनो भगवत एव मुख्यं कारुण्यं॥ तत्कृत एवा १८
न्यः प्रयोजनार्थिनेषु कारुण्यव्यवहारो गौण इति॥ तस्माज्जननीयावत् दृष्टमपेक्ष्य स्वकारुण्यात्म

जी

कृतिरिति॥ ननु नराणां च नराधिपमित्यादिना विभूतीनामपि भगवद्रूपकथनाद्वादिभक्तेरपि मुक्तिः स्यादित्यत आह॥ प्राणित्वांन्न विभूतिषु॥२२॥ जीवोपाध्यनवच्छिन्नविषयैव पराभक्तिः॥ ननु प्राणादिवोपाधियुक्तेषु नरादिभक्तिफलेति॥ द्यूतराजसेवयोः प्रतिषेधाच्च॥२३॥ धर्मशास्त्रेषु द्यूतराजसेवयोः प्रतिषेधः स्मर्यते॥ परमेश्वरे तु तन्न स्यादिति वासुदेवेपीति चेन्नाकारमात्रत्वात्॥ ननु वृष्णीनां वासुदेवोस्मीति विभूतिषु श्रुतिः॥ तथा च राजादिवत्सोऽप्यभजनीय एव स्यादिति चेन्न॥ परब्रह्मण एव कृष्णाकारमात्रत्वात्॥ यथा पराशरः॥ यदेवं वेशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते॥ यत्रावतीर्णं कृष्णाख्यं परं ब्रह्म नराकृतीति॥ जीवत्वे तन्न स्यादिति॥० ॥प्रत्यभिज्ञानाच्च॥२४॥ वासुदेवविषये परब्रह्मप्रत्यभिज्ञा च श्रूयते॥ ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः॥ सर्वभूतस्थमेकं नारायणं कारणरूपमकारणं परं ब्रह्मस्वरूपमिति स्मर्यते च प्रत्यभिज्ञा यथा प्रलये दृष्टानुभावेन युधिष्ठिरं प्रति मार्कण्डेयेनोक्तं॥ यः स देवो मया दृष्टः पुरा पद्मायतेक्षणः॥ सएव

शांडिल्य॰ पुरुषव्याघ्र निबध्नीतेजनार्द्दन इति॥ तथा तपोभिरप्यदृश्यो भगवानिति श्रुत्वा जनमेजयेनाभिहितं॥
१९ तपसाप्यसुदृश्यो हि भगवान् लोकपूजितः॥ तं दृष्टवन्तस्ते साक्षाच्छ्रीवत्सांकविभूषणमिति॥ त
र्हि तत्र केषु फलस्मरणालिङ्गात्॥ तर्हि कथं विभूतिषु तत्कीर्त्तनं तत्राह॥ ॥वृष्णिषु श्रैष्ठेन तत्॥
२५॥ आदित्यानामहं विष्णुरित्यादौ तेषु श्रेष्ठत्वं परमेश्वरस्यैवेति दृष्टिमात्रार्थं विभूतिकथनं तत्र
वासुदेवेपि वृष्णिषु श्रेष्ठत्वमित्येतावन्मात्र दृष्टिविधानार्थं विभूतिषु वासुदेवकीर्त्तनमिति॥
एवं प्रसिद्धेषु च॥२६॥ एवमनेन प्रकारेण वासुदेववद्ब्रह्मलिंगवत्तया प्रसिद्धेषु वाराहनृसिंहवा
मनराम भद्रादिषु भक्तिरपि मुक्तिफलेति बोध्यं॥ यद्वा एवं ब्रह्मलिङ्गवत्तया प्रसिद्धेषु रुद्राणां
शङ्करश्चास्मीत्यादि विभूत्यात्मसु श्रेष्ठ्यमात्र दृष्टिर्मन्तव्या। उक्तं वाराहे॥ विष्णुरुद्रान्तरं बु
याद्यः॰ श्रीगौर्य्यन्तरं तथा॥ तज्ज्ञांतकानां मूर्खाणां वाक्यं शास्त्रविगर्हितमिति॥ शङ्करस्य ब्र राम॰
ह्मलिंगं श्रुतिस्मृत्यादौ बहुलमुपलभ्यत इति॥ ॥इति श्रीस्वप्नेश्वराचार्य्यविरचिते शातस्त्री १९

भाष्ये द्वितीयाध्याये प्रथमाह्निकं ॥ ॥ उक्तो दृष्टोपकारको ज्ञानयोगो संप्रति बंधकदुरितक्षयमुखेनाप
वर्गवत्योगो गौण भक्त्य उच्यते ॥ ॥ भक्त्या भजनोपसंहाराद्गौण्या परायै तद्धेतुत्वात् ॥२७॥ भजन्त्यनन्य
मनसो ज्ञात्वा भूतादिमव्ययमित्यनेन नवमाध्यायप्रतिपादितपरभक्तिमनूद्य तत्पश्चाज्जीतं ॥ सततं की
र्तयन्तो मां यतन्तश्च दृढव्रताः ॥ नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासत इत्यादि ॥ तत्पश्चात् ये भ
जन्ति तु मां भक्त्या मयि ते तेषु चाप्यहमिति ॥ तदुपसंहारस्तत्र तत्र चिन्तया यजेतेति वत्सामानाधि
करण्येन भक्तिनाम्ना भजनेन फलं भावयेदित्यर्थः ॥ एकभक्तिर्विशिष्यत इत्यादौ भगवदुक्तो भ
क्तिशब्दस्य युक्तत्वेन संज्ञाप्राप्तेः भक्तिभजनयोरेकार्थत्वाच्च ॥ नाप्यत्र परभक्तिः फलभावन
या विधीयते ॥ तस्याः कृत्यसाध्यत्वेनाविधेयत्वात् ॥ न चापि तस्या निश्रेयसहेतुत्वमज्ञातं ज्ञाप्य
ते ॥ भक्त्या प्राप्यन्ति मामपीत्यादिना सप्तम एव तज्ज्ञापनस्यापि प्राप्तत्वात् ॥ किं तु परभक्तेर्विघ्ननाश
नसाधनाकांक्षया कीर्तनादिकमेवोपाक्रान्तं ॥ भक्तिशब्देन गौ साव्रत्या तृतीयान्तेन निर्दिश्य पर

मेनसाधनत्वं तेषु विधीयत इत्यत्रार्थवदाकांक्षायां मयि ते तेषु चाप्यहमिति पश्चाद्वान्वयः॥ अन्यथा
भक्त्या भजनं तेन च मयि स्थितिर्वाक्यं भिद्येत॥ कीर्तनादिषु भक्तिसाधनत्वेनायुद्धेत्तमिति भक्ति
शब्दो गौणः शक्यं संस्कारेषु ग्रह इति॥ यद्वा। भज्यते एभिरिति व्युत्पत्त्या तासु भक्तिशब्द उद्भिद्यते॥ अ
थवा चतुर्विधा भजन्ते मामिति भजनगणपागास्वष्टिवत्॥ उदाराः सर्व एवैते इत्यौदार्यगुणयो
गाद्वा गौणत्वमिति॥ ॥रागार्थप्रकीर्तिसाहचर्याच्चेतरेषां॥२८॥ एवं हि श्रुतं स्थाने हृषीकेश तव
प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते चेति॥ तत्र साक्षाद्देवानुरागार्थत्वं कातेन स्पष्टं॥ तत्साहचर्या
त्॥ सततं कीर्तयन्तो मां यजन्तश्चेत्यादिनोक्तादीनामपि तद्देवफलमिति॥ अन्तराले तु शेषाः स्युरुपा
स्यादौ च काण्डत्वात्॥२९॥ भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययं॥ ये भजन्ति तु मां भक्त्या मयि ते
तेषु चाप्यहमित्येतयोरन्तरालयोगौणि भक्तयः श्रोतास्ताः परभक्त्यङ्गानि भवन्ति॥ परभक्तिसन्दे
साद्वैवेति भावः॥ तद्यथा। सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः॥ नमस्यन्तश्च मां भक्त्या नित्ययु
क्ता उपासते॥ ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते। एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखमिति॥ [illegible] अनन्या
तथा

श्चिंतयंतो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्ता-
नां योगक्षेमं वहाम्यहमिति। तथा यान्ति देवव्रता देवान्पितॄन्यान्ति पितृव्रताः॥ भूतानि यान्ति भूतेज्या
न्ति मद्याजिनोपि मां॥ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति। तदहं भक्त्युपहृतमश्नामि प्रयतात्मन
इति॥ तथा। यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्॥ यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्प
णं॥ शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैरिति॥ तत्र नामाभिधानं कीर्तनं॥ भक्त्यर्थं यत्तच्छा
त्रलौकिकोपयुक्तताप्रस्तावादुक्तः॥ दृढव्रतत्वं मन्त्रैकादश्युपवासाद्यनुष्ठानं॥ नमस्कारः स्वाप
कर्षबोधककरशिरःसंयोगादिव्यापारः॥ ज्ञानयज्ञश्चाद्वैविधामुख्यगौणभेदेनैकत्वपृथक्त्वविषय
तया तन्मात्रचिन्ता तु ध्यानं॥ अनुस्मृतिश्च यागपूजा भगवन्तमुद्दिश्य पत्रादिदानं च। तथा विहित
निषिद्धसर्वकर्मणां परमेश्वरसमर्पणमिति। न केवलमेतान्येवाङ्गानि। किं तु मनो ब्रह्मेत्युपासीत॥ आ
दित्यानामहं विष्णुरित्याद्युपासनादिशब्दकवलीकृतान्यपि भक्तिसाधनानि। कुतो ब्रह्मका
रास्य सर्वस्यापि भक्तितत्साधनप्रतिपादकत्वादिति॥ ताभ्यः पावित्र्यमुपक्रमात्॥ ताभ्यो गौणभक्ति

भ्यः पावित्र्यमन्तःकरणमालिन्यहेतुदुरितक्षय एव द्वारं॥ कुतः पवित्रमिदमुत्तममित्युपक्रम्याभिधा
नात्॥ भक्तेरन्तःकरणधर्मत्वात्पावित्र्यस्यान्तरङ्गत्वादिति॥ तासु प्रधानयोगात्फलाधिक्यमेके॥ ३०॥
तासु कीर्त्तनादिषु यो मे भक्त्या प्रयच्छति नमस्यन्तश्च मां भक्त्येत्यादौ प्रकरणादिसिद्धाङ्गभावेषु
पुनर्भक्तिप्रयोगकथनं प्रवृत्तभक्तीनां तदनुष्ठाने फलाधिक्यार्थमेवेत्येक आचार्य्या मन्यन्ते॥ ना
म्नेति जैमिनिः संभवात्॥ जैमिनिराचार्य्यस्तु नाम्नो गुणत्वसिद्धेः॥ श्येनेनाभिचरन् यजेतेत्या
दाविव भक्त्या कीर्त्तनेन भक्त्या दानेन परमभक्तिं साधयेदिति सामानाधिकरण्यसम्भवान्नाम
भावे नान्यार्थमन्यत्॥ न फलान्तरार्थं गौरवादिति भावः॥ ॥ अयथाप्रयोगानां यथाकालसम्भवो
न गृहादिवत्॥ ३१॥ कीर्त्तनमस्यादीनां सहानुष्ठानमेकैकेन विनाविधर्मेण वानुष्ठानमिति
त्रयः पक्षाः तत्राद्ये कस्यचिदननुष्ठानेऽप्यन्येषां निष्फलत्वप्रसंगात्॥ द्वितीये विकल्पः प्राप्तावं
थैक्यनियमः स्यात्॥ तृतीयस्तु शास्त्रार्थः॥ एककृतावन्यान्यस्यानुष्ठानं च प्रसज्यते गौरवात्

।। तस्मादेतेषां मिथो वाच्यमिवादरादहेतुर्वेति पूर्वः पक्षः सिद्धान्तस्तु सर्वाण्येव साधनानि प्रमाण
सत्वात्।। किंतु साऽनुष्ठाननियमो नास्ति प्रमाणाभावात्। येषां तु गंधधूपदीपनैवेद्यादी
नामेकप्रयोगश्रवणं तदितरेषां चैकं तु यथाकालं यथासंभवमनुष्ठानं गृहादाविव।। य
था ग्रहसाधनलक्षणस्तं वा द्याहरणं कदाचिदेकः कदाचित् क्रमशो भूति।। न चैतेनावताल्लक्षणाहर
णादीनामकारणत्वमायाति। तस्माद्यादृशाद्दुरितक्षयसमर्थं तत्तादृशाद्दुरितक्षयं कृत्वा सर्वैः
स्वस्वसामर्थ्यं दर्शितिपरभक्तिसिद्धिरिति।। तथा च गीयते।। बहूनां जन्मनामन्ते ज्ञानवान्मां प्रप
द्यत इति।। ।। ईश्वरतुष्टेरेकोपिवली।।३३।। तेषु मध्ये यः कश्चिद्दृतिशयानुष्ठानेन बलवान् भव
ति।। स एवैकोपि परमेश्वरतुष्टिं जनयित्वा परमभक्त्यै प्रभवति।। बहुतरशिथिलपरिचर्याभिर
पि यथा नेतरः प्रभुस्तुष्यति तथैकेनापि निर्व्यलीकसततत्वत्तपादसंवाहनेन तत्र कीर्त्तनाद्यन्य
तमेनापि दृढतरसेवितेन भगवत्प्रसादाद्भक्तिः प्राप्यते।। यथा बुद्धियोगं समाश्रित्य मच्चित्तः

सततंभव॥ मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसीत्यादि॥ तथा कालादिवृत्तमपि कस्यचि
वलं। यथा। ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्च्चयन्॥ यदाप्नोत्ति तदाप्नोत्ति कलौ संकीर्त्य के
शवमित्यादिकं॥ नच व्यभिचारो वलवत्स्वेकाजन्यभक्तिं प[illegible]तिकीर्त्तन[illegible]त्वाद्दिना हेतुत्वादि
त्ति। ननु कीर्त्तनाद्यानंतरालिकानां सर्वेषामेव पावित्र्यं द्वारमुत केषांचिदन्यद्पीत्यत आह॥
अवंध्योऽर्पणस्यमुख्यं॥ भगवत्यर्पितस्य शुभाशुभकर्मणां स्व स्वफलाजननलक्षणो वन्ध्याभावो
द्वारं। यथोक्तं॥ शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैरिति अर्पणमन्त्रोऽपि पुराणान्तरे॥ का
मतोऽकामतो वापि यत्करोमि शुभाशुभं॥ तत्सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहमिति॥
नच्चैवं स्यात्तस्य प्रसंगः॥ तत्करणवलेन पापाचरणाभावस्यापि तदङ्गत्वात्॥ यथा स्मृतिः॥
नवेदवलमाश्रित्य पापकर्मरतिर्भवेदिति॥ तस्मात्पावित्र्यं तदितरविषयमेवेति॥ अत्र
शुभकर्मस्वाश्रमविहितं नित्यनैमित्तिकात्मकं वाच्यं॥ सम्यगाश्रमपरिपालनाद्ब्रह्मलोकादि

फलेतस्याप्तो मुक्त्ययेविलम्बः स्यादितिसंबंधः॥ ब्रह्मण्यर्पितेतुतत्वसिद्धः॥ एवंकामार्पणाज्ञान
कृतकाम्यपापयोरपिपश्चादर्पणेफलाभावएवेति॥ अथगौणीष्वेवविशेषश्चिन्त्यतेतत्रश्रु
तिस्मृतिमध्येयस्वरूपमुच्यते॥ यथायएषोऽन्तरादित्येहिरण्मयः पुरुषोदृश्यतेहिरण्य
श्मश्रुर्हिरण्यकेशइत्यादि। तथाध्येयः सदासवितृमण्डलमध्यवर्त्तीनारायणः सरसिजासन
सन्निविष्टः॥ केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्र इत्येव
मादि॥ तत्रकिमेवंविधेष्वेवध्याननियमः पूर्णप्रादुर्भावादौवायथाश्रुतेष्वितितत्रध्येयस्व
रूपश्रवणानियमप्राप्तावुच्यते॥ ध्यानध्येयनियमकथनंदृष्टार्थेनानाविषयत्वेचित्तविक्षेपसं
भवात्। तस्मात्सौकर्यार्थमेवतत्कथनंज्ञेयं॥ अदृष्टार्थेविकल्पादिप्रसङ्गात्॥ तस्माद्यथाश्रु
तेषुव्यवस्था॥ अतएवगोपीनांशिशुपालादेश्चतन्नियममन्तरेणैवध्यानस्यदुर्लभफलमुपल
ब्धमिति॥ उपाङ्गैः पूजायामेवप्रयुक्तेः॥ कुतोज्ञायतेविष्णुंपूजयेदित्यादिनानित्यकाम्यपूजाता

ध्याननियमस्य दृष्टसौकर्यात्।४

शांडिल्य· दर्थ्यं विहितात्तस्याः परभक्त्यङ्गत्वमात्रमत्र विधीयते न तादर्थ्यं इतरयागानां तु न तादर्थ्यं श्रुतं ॥ तेषामी
२२ श्वरोद्देश्यकत्वं भक्तिसंयोगश्चोभयं विधातव्यमिति वा कथमेदः स्यात् ॥ अथ विष्णवे उरुक्रमायस्
ते चरुमित्यादि विहितस्य भक्तिसंयोगोस्त्विति चेत् ॥ सत्यं ॥ काम्यानां तत्तत्फले नैव निराकांक्षत्वा
त् ॥ जीवनमात्रनियमेन तु नित्यपूजायास्तु भक्तिसंयोगविधौ वाधकाभावात् ॥ न सततोपस्थि
23 तिलाघवाच्चेति ॥ अत एव मोक्षधर्मे हिंसायुक्तधर्मनिष्ठायां ॥ सर्वकर्मस्वहिंसा हि धर्मोऽयं मनुर
ब्रवीत् ॥ कामरागवहिर्वेद्यां पश्यन्तराः ॥ विष्णुमेवाभिजानंति धर्मोद्देवयजन्ति ते ॥ पाय
स्म.तं से सुमनोभिश्च तथा चेयजनं इति ॥ अथ पूजाप्रस्तावादधिकरणत्रयं ॥ पादोदकं तु पाद्यमव्या
प्तेः ॥ एवं स्मर्यते ॥ गङ्गा प्रयागगयापुष्करनैमिषारिण्यपुण्यानि यानि कुरुजांगलयामुनानि ॥ राम·
कालेन तीर्थसलिलानि पुनन्ति पापात्पादोदकं भगवतः प्रपुनाति सद्य इत्यत्र ॥ तत्किं पादसंसु २२
क्तं जलं पादोदकमुत पादस्नानकोत्कृष्टं ॥ तत्र पाद्यमेव पादोदकं कुतो ज्ञायते ॥ अन्य = था

व्याप्तिप्रसंगात्॥ तथाहि। भगवतः साक्षात्पाद सम्बंधो न सम्भवति॥ नाप्यवतारद्वारा॥ तस्याप्यनु
ष्ठात्तसन्निधानासम्भवात्॥ किंतु पूजाधिष्ठानप्रतिमापादसम्बंधादुपचारः॥ तत्रापि प्रतिष्ठि
ताया अप्रतिष्ठायास्तस्य पूजार्थमावाहने सति॥ तथा च। शालग्रामशिलाधिष्ठाने पादाभावात्त
न्नस्यात्॥ तत्रैवं व्याप्त्यनुरोधात्पाद्यमेवास्तु। प्रतिमाद्यत्यं तु व्यवहितसम्बंधकल्पनाप्रसङ्गा
त्॥ स्वयमप्यर्पितं ग्राह्यमविरोधात्॥ पूजायां भगवते दत्तनैवेद्यनिर्माल्यादिकं वैष्णवं सा
त्वतेभ्य इत्यादिना प्रतिपाद्यत्वेन विहितं। तथेह। सात्वतत्वाविशेषादेव भगवद्भक्तेन
स्वयमपि ग्राह्यं भोजनधारणादिवत्सोपयोगकार्यमित्यर्थः॥ स्वयमपि ग्रहसोप्र
तिपत्तिः सिध्यति धर्मशाक्यं तु वर्जनीयमेव॥ यथाग्न्याद्युद्देशेन त्यक्तपुरोडाशस्यापि
उत्तरार्धात्स्विष्टकृतमद्यति॥ यजमानपञ्चमाः पुरोडाशं भक्षयन्तीति प्रतिपत्तिः॥ तथेदम
पि वचनादेव॥ अन्यथान्यसात्वतेभ्योपि न प्रतिपाद्ये त्परद्रव्यत्वात्॥ वचनादिति चेत्॥

शांडिल्य· न॥ नहि वचनेषु वर्जनमुक्तं ब्राह्मणेभ्यो दद्यादित्यादिना ब्राह्मणात्वाद्यात्मनोपि दानप्रसंगादिति चे
२४ सू त्। दानस्य स्वस्वत्वध्वंसेन परस्वत्वोपादानरूपत्वात्॥ नैव प्रतिपत्त्यो युक्तं। पुरोडाशस्यापि यज
मानेप्रतिपत्तिदर्शनात् क्रयादिवत्। प्रतिपत्तिरपि स्वत्वापादिकैव॥ तदेवं यत्रान्यसात्वतां
संप्रतिपत्तिस्तत्र स्वयं ग्रहणे नाप्यवैगुण्यं परिहार्यमेव। तथा स्वयं दत्तपाद्यादिधारणेपि
25 ज्ञेयमिति॥ किंच। तैर्दत्तानप्रदायेभ्यो यो भुंक्ते स एव स इत्यत्र समानकर्तृकत्वान्स्वत्वाध्वं
सः समानकर्मत्वप्रतीतेः। त्क्वासमभिव्याहृतमनः सामानाधिकरण्येनान्वयात्॥ तैर्दत्तानि
त्यत्र जातीयपरत्वे मानाभावात्। तस्माद्बाधकं विना देवेभ्यो दत्तमपि भोक्तव्यमिति ध्येयं॥
॥ निमित्तगुणव्यपेक्षणादपराधेषु व्यवस्था॥ ३७॥ देवपूजापराधा ह्येते द्वात्रिंशत्परिकी राम· २४
र्तिता इत्युपक्रम्य द्वात्रिंशदपराधास्तत्प्रायश्चित्तानि च विहितानि॥ तत्र किं सर्वापराधव
र्जनं पूजाङ्गमुत केषांचिद्वर्जनमंगं केषांचित्पुरुषार्थ इति॥ अत्रोच्यते। अकर्मण्येन पुष्पेणायो मा

मेर्चयते नरः॥ पतनं तस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे इत्यादि॥ तत्राकर्मण्यानां पुष्पाणां पर्युषि
तत्वान्न पूजाङ्गत्वं॥ किंतु पूजाक्रमप्रयोगमध्ये आचमनादिना तर्पणे कृते तन्निमित्तम
पेक्ष्य प्रायश्चित्तं॥ यत्र त्वेवं त्वा गंधमाल्यानि धूपं यो मे प्रयच्छत्येनेन पूजाक्रमभङ्गापराधे
तत्तत्क्रमस्य पूजाङ्गत्वोद्भवे गुणपरिहारात्प्रायश्चित्तस्याङ्गत्वं द्रष्टव्यं॥ यत्र पूजामन्तरेण
दत्तोकाष्ठमरवादित्वा यस्क्रमामुपसर्पतीत्यादि श्रुतं॥ तत्र व्यक्तमेव पुरुषार्थत्वमिति
व्यवस्थेवेति॥ एवं पूजाया भक्तिसंयोगसिद्धोपनं पुष्पं फलं तोयमित्यनेन भगवदुद्देश्यकदा
नमात्रस्य भक्त्यङ्गत्वविधिरित्याह॥ पत्रादेर्दानमन्यस्यादिविशेषं॥ यद्यदिष्टतमं लोके यच्चान्य
दयितं गृहे॥ तत्तद्धि देयं प्रीत्यर्थं देवदेवाय चक्रिणे॥ इत्यादिना प्राप्तस्य भगवदुद्देश्यक सर्वदान
स्य भक्त्यङ्गत्वविधिः॥ अन्यथा पत्रादिचतुष्टय विशिष्टदानस्य प्रत्येकविधौ वाक्यभेदः॥ तस्मा
त्पत्रादिशब्देन प्राप्तं दानमनूद्योप्यव्ययत इत्यनेन नित्योपवीतस्य दर्शाङ्गत्वविधिरेव सु

शांडिल्य· क्त इति॥ सुकृतजत्वात्परहेतुभावाच्च [redacted] क्रियासु श्रेयस्य्स्य॥ भक्त्या यः सर्वकर्मसु श्रेयस्यस्य एव॥
२५ कुतः परभक्तिहेतुत्वात्॥ इतरधर्मजन्यत्वाच्च॥ यथा। बहवो ज्ञानतपसा पूता मद्भावमागताः॥ ये
यथा मां प्रपद्यंते तांस्तथैव भजाम्यहमिति भावशाश्च भक्तौ प्रयुक्तः॥ गंगाजले किं न वसंति मत्स्या
देवालये पक्षिगणा वसन्ति॥ भावोज्झितास्ते न फलं लभन्ते तीर्थाच्च देवायतनाच्च मुख्या दिति॥
तथा चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुनेति॥ अत्र एवं सुकृतजत्वाद्भक्तीनां तास्तेभ्यो मुख्याः॥
एतेन भक्तिमीमांसायां विचारो युज्यते न मीमांसायामिति युक्तं॥ ननु भक्तीनां गौणमुख्यभा
व स्तथा सति चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन॥ आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भ
रतर्षभेति चतुर्णां तुल्यवदभिधानं किं कृतमित्यत आह॥ गौणं त्रैविध्यमितरेण स्तुत्यर्थत्वा
त्साहचर्यं॥ गौणत्रैविध्यमेव तासां मुख्येन साहचर्यश्रवणं तु स्तुत्यर्थं। यथा राजसमभिव्या साम·
हारेणोक्तत्स्तुत्यर्थत्वात्साहचर्यं॥ गौणत्रैविध्यमेव तासां मुख्येन साहचर्यश्रवणं तु स्तुत्यर्थं। य २५

ध्याराजसमभिव्याहारेणामात्यानां। एवञ्च पापक्षयविपद्धारादिनिमित्तं स्मरणकीर्त्तनाद्यार्त्तभक्तिः
ज्ञानार्थं यज्ञाद्याचारो जिज्ञासा भक्तिः। यथा तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन त
पसानाशकेनेत्यादि। तथा। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दन्ति मानवाः॥ न चलति निजवर्णधर्मतो
यः सममतिरात्मसुहृद्विपक्षपक्षे। न हरति न च हन्ति किञ्चिदुच्चैः स्थिरमनसं तमवेहि विष्णुभ
क्तमित्यनेन स्वस्ववर्णाश्रमविहितवेदानुवचनादीनां ज्ञापनार्थमनुष्ठानं जिज्ञासा भक्तिः। अर्थार्थि
ता भक्तिरपि द्विधा तत्रैका परभक्त्यर्थं क्रियमाणा पृथ्वीरूपा अपरा राज्याद्यर्थं क्रियमाणा नीचकीर्त्तना
दिरूपा यथा। भौमान् मनोरथान् कामान् स्वर्गिवन्द्यं परं पदं। प्राप्नोत्याराधिते विष्णौ निर्वाण
मपि चोत्तममिति॥ तत्र निर्वाणप्राप्तिः परभक्तिद्वारेति परभक्तिः। प्रयोजनार्थिता। ये भजन्ति तु
मां भक्त्या मयि ते तेषु चाप्यहमित्यनेन सहैकवाक्यत्वात्। यच्च भागवते। श्रवणं कीर्त्तनं विष्णोः स्मर
णं पादसेवनं॥ अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनमिति पुंसार्पिता विष्णौ भक्तिः स्यान्नवल

शां०डि०सू० क्षणाइत्ति। एतेष्वेवयथायथमन्तर्भावनीयंतूदेवमुपाधीनामेषामुपधेयसाङ्कर्य्येपिनदोषा
२६ यइति।।ननुकीर्त्तनादीनामङ्गत्वेकथमार्त्तोरिप्राधान्यंघटतइत्यपेक्षायांउच्यते।। ।।वहि
रन्तरस्थमुभयंवेष्टिसम्बन्धवत्।।७९।।स्मरणकीर्त्तनादीनांपरमभक्त्यङ्गतयातदन्तर्गतत्व
26 मनारभ्यफलान्तरश्रवणात्तद्वहिर्भावेनोत्कर्षोपि।।यथाराजसूयान्तर्गतापिवेष्टिःप्रधानाप्य
नारभ्यफलान्तरसम्बन्धात्ततउत्कृष्यते।।यथाबृहस्पतिःसवःक्वचित्प्रधानमपिवाजपेया
ङ्गं।।तद्वत्प्रमादसत्वासत्वाभ्यांविशेषात् एवंप्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत्।स्म
रणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिः।।इत्यनेननसर्वकर्मकर्मणांनैमित्तिकाङ्गत्वेनापि
प्रवृत्तेः।।स्वभावाङ्गत्वंस्वर्गादिफलायप्राधान्यंचननिरुद्धमिति इदानीमार्त्तभक्तोविशेष
श्चिन्त्यते स्मृतिकीर्त्योःकथादेश्चार्त्तौप्रायश्चित्तभावात्।।८०।।स्मरणकीर्त्तनकथानम राम २६
स्कारादीनामार्त्तभक्तोनिर्देशः।।तत्तत्पापकृतनरकार्त्तिमतांतत्पापक्षयहेतुत्वेनकथना

त्॥ तथा पापे गुरूणि गुरूणि लघूनि लघून्यपि तद्विदः॥ प्रायश्चित्तानि मैत्रेय जगुः स्वायम्भुवा
द्यः॥ प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै यानि तेषामशेषाणां कृष्णानुस्मरणं परं॥ त
थाप्यन्नामकीर्त्तनं भक्त्या विलापयनमनुत्तमं॥ मैत्रेयाखिलपापानां धातूनामिव पावकः॥ एवं सर्वाश्रमाभिग
मनं सर्वतीर्थावगाहनं॥ न तथा फलदं सौते नारायणकथा यथा॥ पाविताङ्गाः स्कसंस्वत्ताश्चत्वे मामादितः
कथां॥ नारायणाश्रयां पुण्यां सर्वपापप्रणाशिनीमित्यादि तस्माद्युक्तमात्मनिवेशनमिति॥ न्यूयता
मनुष्ठितिरिति चेदाप्रयाणमुपसंहारान्महत्त्वपि॥ स्यादेतत् न्यायविरोधादेतद्वचनानांस्वल्पपा
पविषयत्वमेव युक्तं॥ अन्यथा न्यूयः क्लेशसाध्यानामननुष्ठानलक्षणप्रामाण्यमिति चेन्न येषामा
रागसंहारस्मरणात् क्लेशाधिक्यात् यथा॥ तस्मादहर्निशं विष्णुं संस्मरन् पुरुषो मुने॥ न याति न
रकं शुद्धः संक्षिप्ताखिलकल्मषः इत्यनेन सान्तत्योपसंहारात् उपक्रमोपसंहारयोरेकार्थत्वादिति
भावः न चोपक्रमकालः श्रूयते येन तद्विरोधादुपसंहारस्य भिन्नार्थतापि भवेत् न च क्लेशसाम्या

शांडिल्य· दितरेषां नानानुष्ठानप्रामाण्यं। प्रान्तनिशि तपासन्ध्याम ध्यान्हादिषु संस्मरन् इत्येतदनयुक्त्यनु
२७ वाद एव॥ नाप्यनुतप्ताधिकारिकमिदं॥ कृते पापेनुतापो वै यस्य पुंसः प्रजायते॥ प्रायश्चित्तं तु तस्यै
कं हरिसंस्मरणं परमित्यस्यापि सर्वप्रायश्चित्ताङ्गानुतापस्यानुवादत्वादेकमित्यस्यापि प्रायश्चि
27 त्तांतरनैरपेक्ष्यस्य न्यायप्राप्तस्यानुवादः॥ अन्यथाभिधेरनुवाक्यानि विशिष्टाविषयाश्च भवे
युरतो यच्छ्रद्धान्तरतित्वाद्यथा यथमनुवादार्थवादत्वे पूर्ववाक्यानां॥ अत एवान्यत्रापि॥ किंक
च रादंडपाशौ च न यमो न यातनाः॥ समर्थोस्तस्य यस्यात्मा केशवालम्बनः सदा॥ चक्रायुधस्य
नामानि सदा सर्वत्र कीर्त्तयेत्॥ नाशौचं विद्यते तस्य स पवित्रकरो यतः इत्यादिभिः सात्तत्य मु
क्तमिति॥ ॥लघ्वपि भक्ताधिकारे महत्क्षेपकमपरसर्वहानात्॥४२॥ लघ्वपि सकृत्स्म राम·
रणकीर्तनादि महतामपि पापानां क्षेपकं नाशकं भवति॥ यतो भक्ताधिकारे प्रायश्चित्तान्त २७
राणां सर्वेषां त्यागलक्षणहानिप्रतीतेरित्यर्थः॥ यथा गीतं॥ सर्वधर्मान्परित्यज्य मामेकं श

रणं व्रज॥ अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुच इति॥ अत्र न काम्यकर्मत्यागपूर्वकत्वमर्थः
काम्यत्यागे पापाभावात् किं भगवता मोक्षणीयं॥ अथ पापान्तरं नाशयं काम्यत्यागस्यास्यष्टार्थ
त्वापत्तेः॥ नित्यनैमित्तिकयोरपि त्यागपूर्वकता न तस्यार्थः॥ तयोस्त्यागे यदि विधिरस्ति न तत्तः पा
पं किं मोक्षणीयं॥ अथ नास्तीति वाच्यं मैवं॥ वाक्येनैव तद्विधानात् पापाजनकत्वात्॥ अथ सर्व
धर्मान्परित्यज्येत्यनेन संन्यासिनमनूद्य तत्र रधिकारिकमिदं॥ तेषामप्यवकीर्णी रिः प्राय
श्चित्तस्मरणात् तैः सह विकल्पप्रसंगात्॥ पूर्ववन्महतामननुष्ठानं च स्यात्॥ न च सातत्येन दो
षपरिहारः॥ महापातकयुक्तोपि ध्यायन्निमिषमच्युतं॥ पुनस्तपस्वी भवति पंक्तिपावनपावन
इत्यादिना लघुनोपि महत्क्षेपकत्वात्॥ किं च॥ संन्यासाश्रमस्यासन्निधानेन बुध्यनाशेनात्॥
तस्माद्यथा लोके सर्वान् विहाय मां भजन्क्लेशांस्ते नाशयामीत्यत्र क्लेशनाशकान्तरहानिः प्रती
यते॥ तथात्र पापनाशकान्तरत्यागोऽवगम्यते वाक्यादेव॥ एतेन कथंचित्संन्यासविधायकेन स

शांडिल्य·
२८
28

हैकाध्यायपाठेऽपि प्रकरणसन्निधानयोः सबलत्वात्॥ किं च॥ अस्मिन्नध्याये काम्यानां कर्मणां
न्यासं संन्यासं कवयो विदुरित्यादिना काम्यकर्मत्याग एवोक्तो न संन्यासाश्रमः॥ एवञ्च प्राश्चि
त्तांतरत्यागसंकल्पेन केवलभगवन्नामादिभिरार्जितं यस्तर्तुमिच्छन्ति तदधिकारिकमेव सकृत्स्म
रणादि तथा च न भिन्नाधिकाराद्दूषणानां समुच्चितिः॥ नापि क्लेशभयाद्व्यसामनुनेष्ठानं॥
दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत्॥ स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् इत्यने दू
नतादृशन्यासस्य हेयत्वात्॥ कलिकल्मषमत्युग्रं नकार्निप्रदं नृणां॥ नयान्ति निरयं सद्यः स
कृद्यत्रानुसंस्मृत इत्यादि तदधिकारपरं॥ एवमपि चेत्सुदुराचारो भजते मामनन्यभाक्॥ सा
धुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः॥ क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति॥ कौन्तेय प्र
तिजानीहि न मे भक्तः प्रणश्यतीत्यनेन॥ तथा नारकाः कृष्ण कृष्णेति नारसिंहेति चुक्रुशुः॥ इति राम·
संकीर्तिते विष्णौ नारके भक्तिपूर्वकं॥ नारक्यो यातनाः सर्वास्तेषां नष्टा महात्मनामित्यादिना २८

चभक्त्यधिकारः सुव्यक्त इति॥ अत्रकीर्त्तनस्योच्चारणमात्रत्वमिह प्रतीतं। ननु प्रथमां तपदेनेत्यादिनि
यम इति। तत्स्थानत्वादन्यधर्मः खलेवालीवत्॥ प्रायश्चित्तं हितस्यैकं हरिसंस्मरणं परमित्यादै
नामातिदेशेन प्रायश्चित्तान्तरधर्मस्तु नमन्तव्यः प्रायश्चित्तस्थानत्वात् तत्स्थानविहितत्वात्॥
इत्यर्थः। यथा खलेवालीयूपो भवतीत्यत्र परियोजनेयूपकार्ये खलेवालीविधिरपि न यूपधर्म्मोर्था
स्वीकरणादिप्रसंगस्तद्वदत्र न खलोमादिवापनानां प्रायश्चित्तधर्माणामप्राप्तेरिति। नच कीर्त्त
नमादेरपि पापक्षयहेतुत्वात् प्रायश्चित्तमेवेति वाच्यं॥ प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते॥
तपः प्रायश्चित्तमिति स्मृतमित्यनेन तपोरूपप्रायश्चित्ते शब्दो मुख्योऽन्यत्र गौण इति ध्येयं॥ अथ शा
नां प्राधान्याधिकारणेनेयत्तात्तदधिकारश्चिंत्यते॥ आनिन्द्योऽप्यधिक्रियते पारंपर्यात्सामान्य
स वत्॥४४॥ निन्द्यश्चाण्डालादियोनिस्तत्पर्य्यन्तं भक्तावधिक्रियते॥ संसारदुःखजिहासाया अविशेषात्
॥ अथ वेदाध्ययनानधिकारात् कथमत्रैवर्णिकानां स इति चेत्तत्राह॥ पारंपर्य्यादिति॥ चोदनालक्ष

शांडिल्य॰ २९ णोयो धर्मः शास्त्रयोनित्वादिति न्यायाद्लौकिकोऽर्थः श्रुत्येकगम्य इत्यत्र न विप्रतिपद्यामहे॥ किंतु। स्त्रीशू
द्रादीनामितिहासपुराणानां द्वाराचांडालादीनां च सत्याचारवहुपदेशपारम्पर्येण ज्ञानमपि श्रुति
मूलमेव भवति॥ यथा तेषां सामान्याहिंसादिधर्मादिज्ञानं॥ अन्यथा तदसिद्धिप्रसंगादिति॥ अतो ह्य
विपक्वभावानामपि तल्लोके॥ ४५॥ यतः सर्वाधिकारः अतः खलु येषामत्र परभक्तिर्विपक्वभावं न
29 गता तेषां श्वेतद्वीपे भगवल्लोके परभक्तिसाधनानुष्ठानं स्मर्यते॥ यथा नारायणीये। क्षीरोदधेरुत्तरतः
श्वेतद्वीपो महाप्रभः॥ तत्र नारायणपरा मानवाश्चंद्रवर्चसः॥ एकांतभावोपगतास्ते भक्ताः पुरुषो
त्तमे॥ इत्याद्युपक्रम्य तेषां परभक्तिसाधनानुष्ठानं श्रुतं॥ सहिताश्चाभ्यधावन्त ततस्ते मानवा द्रु
ताः॥ कृतांजलिपुटा हृष्टा नम इत्येव वादिनः॥ ततो विवदतां तेषामश्रौषं विपुलध्वनिं॥ बलिः कि
लोपक्रियते तस्य देवस्य तैर्नरैरित्यादि॥ तस्मात् सर्वत्र तदधिकार इति॥ अत एव तदुपर्यपि वा राम॰ २९
दरायणेन सम्भवादिति सूत्रितं॥ अथाविपक्वभावानामपि कथं तल्लोकेषु एषपापविवर्जिताः
कृतस्युपोद्घातेनोच्यते। क्रमैकगम्य एष ते स्त ५५ तु स्वात्तत्रांक्ष्यवच्छेदार्थः। नारायणीय एव श्रूयते येपि मिथ
नुषा लोके २

इत्युपक्रम्यादित्यमंडलद्वारा निरुद्ध प्रद्युम्नसंकर्षणव्यूहक्रमेण गतिमभिध्यायाभिहितं॥ समाहितमन
स्काश्च नियताः संयतेन्द्रियाः॥ एकांतभावोपगता वासुदेवं विशन्ति ते इति क्रमगत्यभिधानं तथा तत्र
श्चादुक्तं॥ ये तु दग्धेन्धना लोके पुण्यपापविवर्जिताः॥ तेषां त्वया विनिर्दिष्टा पारम्पर्य्य क्रमगतिः॥ च
तुर्थ्यां चैव ते गत्यां गच्छंति परमं पदं॥ न न मे कान्त धर्मोयं श्रेष्ठो नारायणप्रियः॥ अगत्वा गतयस्तिस्रो
गच्छत्यव्ययं हरिमित्येकगत्यभिधानं च पक्व भक्ति विषयत्वेनोपपद्यते अन्यथा विरोधात्॥ तस्मा
दपक्व विषयस्तच्छ्लोकलाभ इति॥ उत्क्रान्ति स्मृति वाक्यशेषाच्च॥ ४७॥ उत्क्रांतौ॥ भक्त्या यु
क्तो योगबलेन चैवेत्युपक्रम्य। ॐ मित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्॥ यः प्रयाति त्यजन्देहं
स याति परमां गतिमित्युक्तं तत्र वाक्यशेषः॥ अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं तत्र प्र
याता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः इति क्रमाद्गतिः श्रुता॥ तथा॥ आब्रह्म भुवनाल्लोकाः पुनराव
र्त्तिनोऽर्जुन॥ मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यत इति॥ वाक्यशेषे लोकोपक्रमादुपशा

शांडि॰ सू॰ ३० 30

महिम्ना चतुर्थसमीपलोकप्राप्तिरविपक्वभावानामेवयुक्ता विपक्वभावस्य हि न तल्लोकगमनमपि फ
लं युज्यते। तत्फलस्याक्षयित्वात् तल्लोके साधनानुष्ठानश्रवणाच्च॥ किंच॥ अपक्वभक्तेस्तत एव क्रममुक्ति
सिद्धेः तत्कालीनस्मरणविधिवैयर्थ्यप्रसङ्गात्॥ न चैतेन परभक्तिसमुच्चयो घटते॥ पुरुषः स परः पा
र्थ भक्त्या लभ्यस्त्वनन्ययेत्यस्य तन्निरपेक्षमोक्षसाधनत्वावगमतेः तस्माल्लोकेऽप्यधिकारः॥ भार तौ
तभूमेस्तु॥ न खल्वन्यत्र मर्त्यानां भूमौ कर्म विधीयत इत्यनेन कर्मोत्पत्तिहेतुतैव॥ भक्तिस्तु न क
र्मात्मिकेत्युक्तं प्राक्॥ तदङ्गानाम प्राप्तिः स्यादिति चेत्॥ न प्रधानप्रादुर्भावांगप्राप्तिर्निषादस्थ
पतियागांगवदिति॥ शूद्रादीनां तु वैदिकमन्त्रांगकर्मनिवृत्तिर्न तु स्मरणकीर्तनादेर्भक्तिसाधन
स्येति तावतैवाधिकारसिद्धौ न विद्याप्रयुक्तिकल्पना युक्ता॥ अस्तु तर्हि महापातकिनामपि प राम॰ ३०
रभक्तावधिकारः तथा तदंगांगवेदानुवचनादावपीत्यत आह॥ महापातकिनां त्वार्तौ॥ पतनहे
तुपापरतानां पुनरावृत्तिभक्तावेवाधिकारः॥ प्रायश्चित्तवन्नान्यत्र॥ तत्पापक्षयस्य सर्वापेक्ष्या

म्यर्हितत्वात्॥मुन्ज्ञानोवर्द्धयेत्यापमित्यादिनातद्पगमेतुस्फुतरामधिकारसिद्धिः॥ अथैकान्तिकप्र
स्तावात्स धर्मः किंपरभक्तितोभिन्न इतिशंकापिशाचीमपाकरोति।सैकान्तभावोगीतार्थप्रत्यभि
ज्ञानात्॥सापराभक्तितोरेवैकान्तभावोनान्यः॥कुतोगीतार्थेनप्रत्यभिज्ञाश्रवणात्॥यथानारायणी
य एव।सहोपनिषदोवेदास्तेविप्राःसम्यगास्थिताः॥ यजन्तिविधिमास्थायचापियतिधर्मिणः॥ ये र
ततोविशिष्टंजानामिगतिमेकान्तिनांन्टणां॥कैनैषधर्मःकथितोदेवेनऋषिणाथवेतिप्रश्नेप्रत्यु
तरं॥समुपोटेष्वनीकेषुकुरुपाण्डवसेनयोः।अर्जुनेविमनस्केवैगीताभगवतास्वयमिति॥तस्मादे
कान्तितापरभक्तिरिति॥अथ राघोऽपिसाक्षाद्भक्तिंजनयत्नुकोदोषस्तत्राह॥परांकृत्वैवस
र्वेषांतथेत्याह॥परांभक्तिंकृत्वैवसर्वेषांमुक्तावुपयोगस्तथाहिसहेतुकंभगवानाह।यइमंपरमं
गुह्यंमद्भक्तेष्वभिधास्यति॥भक्तिंमयिपरांकृत्वामामेवैष्यत्यसंशयमिति॥तत्रैतद्धर्मस्योपदे
शाफलमपिब्रह्मभावापत्तिरित्येतावतार्थसिद्धौभक्तिंमयिपरांकृत्वेतिकिमर्थमाह॥तस्यामोक्ष

शां·डिल्य· साधनत्वेन कृतत्वात्॥ अतएवोपरिचरवसोरात्माराज्यंधनं वेत्यादिनापरमेश्वरानुरक्तिरू
३१ पायाभक्तेर्लिङ्गंप्रदर्शितमिति॥ फलतः प्रयोजनलाभात्। तस्मात्सर्वेषांमुक्तिहेतुत्वेनमोक्षा
जनकत्वात्॥ एवंचदृष्टार्थताभवतिवाक्यस्येति॥ ॥ इतिश्रीस्वप्नेश्वराचार्यविरचितेशात
31 सूत्रीयभाष्येद्वितीयाध्यायस्यद्वितीयमाह्निकं॥ ४०॥ ०॥ समाप्तश्चद्वितीयोध्यायः॥ ॥भज
नीयोत्तमत्वेनभक्तेरुत्तमतायतः॥ भक्तेरुक्तत्वात्तश्चात्रभजनीयोनिरूप्यते॥ भजनीयेनाद्वि
तीयमिदंकृत्स्नस्यतत्स्वरूपत्वात्॥ ज्ञानाधीनाज्ञेयसिद्धिरितितन्त्रेषुनिर्णयः॥ ज्ञानसत्ता
न नजातिःज्ञाताज्ञात्यादौदृष्टत्वतः। सत्त्वेवानेकसम्बन्धकल्पनागौरवादपि॥ तस्माज्ज्ञानंपरं
ब्रह्मसर्वत्रानुगतंस्वतः॥ तदभेदोदृश्यमात्रेदृश्यभेदस्तुसत्परे॥ घटोज्ञानमितीदृक्कस्यास्त्र राम·
त्यये: सन्निहितवाभवेत्॥ अस्तिस्वरूपधीनेवस्वत्वेत्वेनानुपस्थितेः॥ तदुपाश्रानेविष ३१
यज्ञानेच्छाकृतहेतुता॥ तस्यांसविषयत्वेनहेतुत्वेलाघवंमहत्। यतत्सविषयंब्रह्मगुणं

णवन्नैवगौरवात्॥ कालस्यैवोपाधिकृतात्तज्ज्ञानत्वादिकल्पना॥ तच्छक्तिर्मायाजडसामान्यात्॥२॥ तस्यप्र
लक्षणैश्वर्यशक्तिर्मायेतिगीयते॥ दैवीह्येषागुणमयीममभायादुरत्यया॥ मामेवयेप्रपद्यंतेमायामेतां
तरंतिते॥ मयाध्यक्षेणप्रकृतिः सूयतेसचराचरं॥ हेतुनानेनकौन्तेयजगद्विपरिवर्त्तते॥ न मायात्वेनतु
कार्य्याणांवैचित्र्यान्मानतत्वतः॥ कार्य्यसत्तोपपत्त्यर्थंब्रह्मसत्ताश्रुतेरपि॥ मिथ्यात्वस्यनिरुक्तिश्चतन्मि
थ्यात्वं नसांप्रतं। तत्वेज्ञानेनबाधित्वंमिथ्यात्वमितिचेन्नहि॥ मिथ्यात्वस्यापिमिथ्यात्वात्सत्यत्वं सुतरांस्थि
तं॥ मिथ्यात्वस्यचसत्यत्वेद्वयसत्यत्वमागतं॥ अलीकानामभावाच्चभाव्यत्वेतुसदेववत्॥ रज्जौसर्पा
दिभानंयदन्यथाख्यातिरेवसा॥ अन्यत्रसद्सत्वाभ्यांबाधाबाधव्यवस्थितेः॥ सामायाजडसामान्यं
ज्ञेयत्वंनित्यमेवतत्॥ अन्यथासर्व्ववस्तूनां स्यात्तस्माच्चिज्जाड्यनित्यता॥ ॥व्यापकत्वाद्व्याप्यानां॥३॥
एवंव्यापकतत्वेभ्योव्याप्यतत्वसमुद्भवः॥ व्यापकानांहितादात्म्यव्याप्योपादानतामता॥ नताव रामः
त्समवायेनभेदसम्बंधगौरवात्॥ शक्तानांसमवायोपिशृंगग्राहिकयालघुः॥ सत्वेनसर्वका

५ अङ्केविकारे

शांडिल्य॰ ध्येयेषु कारणत्वं परेशितुः। निमित्तत्वं हि तद्बुद्धेर्वोद्धव्येष्वनुगत्वतः॥ बुद्धेस्तत्साक्षिभाव्यायां बोध्य
३२ त्वं च यतो धियः॥ बोद्धव्याया बुद्धिजत्वव्यभिचारोपि संभवेत्॥ सुप्तोत्थितस्य प्रलयाद्बुद्धेः प्रथममु
द्भवः॥ कार्य्यकारणभावादि बुद्ध्यौ निर्माति स प्रभुः॥ स्वतो निर्विषयाप्येषा चैतन्योपाधिभावतः॥
तैलादिवस्त्रदीपस्था सप्रकारप्रकाशिनी। करिष्यामीति संकल्पादहंकारोद्भवस्ततः॥ स एक्ष
त वक्तुः स्यामित्येवमाहश्रुतिस्मृतौ। धिद्वारावनुगतादहंकृतेः॥ व्यापकेतत्वतत्वेनु बुद्धिव्याप्य
कभावतः॥ ईशोऽहंकृतिजन्यत्वन्तत्तेने स्यादहंकृतेः॥ मात्राभूतेन्द्रियादीनामहंकारोपि कारणं।
तत्र शब्दस्पर्शरूपरसगंधत्वसंज्ञया॥ सामान्यान्येव शब्दादिस्थूलानां चापि हेतवः॥ सर्वत्र ग्रह एव
ति स्यात्तत्वानामिति वेदतः॥ विकारग्रहणे जाँग्रहवत्तद्ग्रहस्थितेः॥ एवं व्यापकतत्वानां व्याप्येष्वनुगमक्रमा त
त्॥ ब्रह्मादि सर्वतत्वानां घटोपादानता स्फुटा॥ न कर्मणोन्यथासिद्धिरहतत्वस्य युज्यते॥ तदा स्या राम॰
दन्यथासिद्धेरतादात्म्यात्प्रयोजकं॥ एवं कारणतत्वानां मोक्षोपायतया पुनः॥ निर्मितान्प्राणिबु ३२

ध्यादिमत्तादात्म्यात् पृथक् पृथक्॥ आसर्गप्रलयादीनां बुद्धिर्नास्ति चयत्कचित्॥ सुषुप्ते जीवबुद्धी
नां लयेऽनन्तः समीक्षणे॥ अथानीश्वरसांख्यानां बुद्धेः सर्गेऽनियुज्यते॥ क्रमाद्धि निगमाभावादित्येतत्सू
त्रमुच्यते॥ ॥न प्राणिबुद्धिभ्योऽसम्भवात्॥४॥ क्रमादेवर्षिसर्पादिः श्रूयते कस्य बुद्धितः॥ सम्भवति च
सर्गेयं तस्मादीशोपि बुद्धिमान्॥ ॥निर्मायोच्चावचं श्रुतीश्च निर्मिमीते पितृवत्॥५॥ उच्चावचानि म
तानि धर्म्माधर्म्मानुसारतः। निर्माय निर्मिमीते सौ वेदांस्तद्धितकाम्यया॥ यथा पितोत्पाद्य पुत्रान्ना
याजनयत्यपि॥ हिता॥ हितपरिहारौ वा क्वैतस्तद्द्वयं प्रभुः॥ ॥मिथ्योपदेशान्नेति चेन्न स्वल्पत्वात्॥६॥
अथा यमीश्वरो नैवाहितः पितृसमो यतः। पापसाधनहिंसाभिर्म्मिश्रयोगोपदेशनात्॥ इति चेन्न प्रधीश्वे
वफलसौख्याद्यपेक्षया॥ अंगहिंसाफलाल्पत्वान्नाहितस्तद्विधानकृत्॥ ननु क्रत्वङ्गहिंसायाः प्र
धानैकफलत्वतः॥ न सामान्यनिषेधस्य विषयत्वं प्रसज्यते॥ कुर्यान्न कुर्यादित्येवं विकल्पस्त्व
न्यथा भवेत्॥ तस्माद्विशेषादन्यत्र स्यान्यदाहवनीयवत्॥ अत्रोद्यतेऽङ्ग हिंसायाः स्याद्दर्वस्यहे

शां॰उ॰न॰ ३३

तुला पापेहेतुश्च सामान्याहिंसेत्येवा विरोधिता॥ अथ प्रबलदुःखस्यानुबंधी वध्रहेतुना॥ विधार्थीपि
नञा युक्तस्तदभावस्य बोधकः॥ तथा च सर्वात्माहि स्याद्यस्य दुःखाद्यहेतुता॥ सत्वं यागांगहिंसा तोयत
दुःखं प्रबलं न तत्॥ प्रधानफलसौख्यादेरनैयत्यान्तरीयकं॥ अन्यथातिप्रसङ्गः स्यात्प्रबलत्वान्निरू
क्तितः॥ तस्माज्जातिविशेषोयं दुःखेषु प्रबलत्वता॥ प्रायश्चित्तादि मरणे प्रयागमरणेपि वा॥ आ
त्महत्याकृतं दुःखं तत्फलापेक्षया लघु॥ अतः प्रत्यवमर्षं हि प्राह पंचशिखोपि तत्॥ स्वल्पत्वान्नव
लीयस्त्वाद्यत्र दुःखस्य गौरवं॥ पर्य्यग्नीकरणे त्सर्गस्तत्र श्रुत्येव दर्शितः॥ पश्चिमनाग हस्तान्ना
मितिस्मृतिषु चोदितं॥ न सामान्यविशेषो हि किंनरैश्वर्य्ये स्फुरतां यथा। रपि नीवापश्चुहानरकं श
रणं ब्रजेत्॥ अतिप्रसङ्गाच्छ्रोता नानामर्वेमथ चिन्त्यते॥ कर्तृभोक्तृकृतं कर्म किमथ वा परमेश्वरे॥
॥ फलमस्माद्बादरायणो दृष्टत्वात्॥ ७॥ राजादिरोषतोषाभ्यां दृष्टत्वात्कर्मणां फलं। अस्माद्ब्रह्म
ण एवाह भगवान्बादरायणः। तत्तत्कर्तृगतं कर्म पुत्रेष्टि फलदर्शनात्॥ अथ भोक्तृगतो भोगः

राम॰ ३३

33

कस्मिन्निमेषे विचिन्त्यते॥ अन्योन्याश्रय एवस्याद् उभयोः सव्यपेक्षणात्॥ तस्माद् दृष्टतया रोषतोषाभ्या
मपरेशितुः॥ हिताहितफलप्राप्तिः फलोद्देश्यकृता भवेत्॥ नाप्युद्देश्यगतत्वेन व्यापारान्तरकल्पनं॥ अ
न्यथा राजसेवादावप्येवं प्रसज्यते॥ अत एवेश्वरप्रीतिप्रदत्वं कर्मणां श्रुतं॥ ये तु धर्मामृतमिदं
यथोक्तं पर्युपासते॥ श्रद्दधाना मत्परमा भक्तास्तेतीव मे प्रियाः॥ रोषतोषादि सत्वेपि न संसारित्वमीशि
तुः॥ तद्धेतुत्वाद् दुःखलोभान्नित्यमुक्ततयापि च॥ व्युत्क्रमादप्ययस्तथा दृष्टः महाप्रलये व्याप्यतत्वानां
व्यापकेषूत्क्रमान्मतः॥ व्यापिकायां मृदि व्याप्यघटादिलयदर्शनात्॥ इति स्वच्छेश्वराचार्यविरचिते स्मृ रात
त्रीयभाष्ये तत्त्वपाध्यायस्य प्रथमाह्निकं॥ ॥जीवस्य ब्रह्मभावो हि मुक्तिरित्यभिधीयते॥ तद्विवे
कतयात्रापि भजनीयविवेचनं॥ ॥अन्यस्य कथं तत्त्वं घटेतेति वितर्कयन्॥ जीवानां भगवद्भाव
योग्यतामाह॥ सूत्रकृत्तदेकं नानात्वेकमुपाधितो न वस्तुतः॥ सर्वं च खल्विदं ब्रह्म नेह नानास्ति कि
ञ्चन॥ यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः॥ क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत॥ क्षे

४८ कथं प्रकाशात्मनां परेण परमेश्वरेण सह दृष्टत्वदृश्यत्वलक्षणसम्बंधाभावात्॥ ४८

शांडिल्य० ३४ क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारतेत्यादि भिन्नस्यैकत्वमेव स्वभावः उभयथा नात्मप्रत्ययः
स जीवोपाधिबुद्धिमात्रकृतः॥ तथा च श्रुतिः॥ एकधा बहुधा चैव दृश्यते जलचन्द्रवत्॥ वै
ष्णवे च॥ सितनीलादिभेदेन यथैकं दृश्यते नभः॥ भ्रांतदृष्टिभिरात्मापि तथैकः सन् पृथक् पृथक्
इति। ततः परभक्त्या जीवोपाधिबुद्धिहाने सति पुनरेकत्वमप्यविरुद्धं॥ यथादित्यस्य प्रकाशात्म
नः प्रतिबिम्बोपाधिदर्पणाद्यपगमे तद्वत्॥ ॥ पृथगेव चेन्न परेण सम्बंधात् प्रकाशानां॥ पृ
त्मा थगेव परस्परमत्यन्तभिन्नाः प्रकाशा नैव जीवाः॥ अन्यथा कश्चिन्मुक्तः कश्चिद्बद्ध इति
व्यवस्था न स्यादिति चेत्। न॥ कथंचिदनीश्वरसांख्यानां तथा सम्भवोपि सेश्वरसांख्यानां तद
सम्भवात्॥ तेषां स्वप्रकाशतयादित्येनेव प्रदीपानामप्रकाशतयादित्येनेव प्रदीपानामप्रका राम०
शनात्॥ यथा चानीश्वरत्वमसार्वज्ञमज्ञेयत्वं ब्रह्मणः स्यात्॥ अथ प्रकाश्यास्तेषां जाड्यप्रसं ३४
गात्॥ नापि मिथो वैत्या प्रकाश्यत्वं लब्धितमोभिभवेनैवान्धकरणसत्त्ववत्वान् न च तदयोग्यत्वे

बुद्धि २

सत्त्वसम्भवति॥ न खल्वावरणनिवृत्तावपि दीपान्तरेणप्रकाशापत्तरिति॥ वांम्यन्तरप्रकाशयोः कश्चिद्दोपा
धिकोप्येकधर्म्मः येषु स्वयंज्योतिरेवायंपुरुष इत्यादौ गौणो ज्योतिःशब्दः॥ तस्माच्चिदात्माजगत्प्रकाशकत्वे नै
व सिध्यतीति न तत्र परापेक्षा॥ किंच। मनोधर्मत्वेऽभिदास्थितावं धमोक्ष× मतत्व धियोरधिष्ठानतया चात्मसि
द्धिरप्रत्यूहैव॥ बुद्धिवृत्तीनां तु गोण एव ज्ञानत्वा सुखत्वव्यवहारः॥ किं मानसात्मनां भेदे बुद्धिसत्त्व× व्यवस्था
ने नित्यमुक्तात्मनां कुत इति॥ अथ विकारिण एव सन्त्वात्मनो ज्ञानेच्छादयस्तद्गुणा जानामीच्छामि सुखी दुः
खीत्यादिप्रत्यया दिति मतं निरस्यन्नाह॥ ॥न विकारिण स्तकरण विकारात्॥ न ज्ञानादिविकारवन्त आ
त्मनो भवितुमर्हन्ति॥ कुतः सुखोपलंभादिकरणत्वेन ज्ञानादीनामुपपत्तेरात्मनामविकारित्वात्॥ त
थाहि। सुखोपलब्धिः सकरणिकेत्याद्यनुमानेतादृशकरणसंबंधस्यतादात्म्येन सत्वात्॥ गौरत्वादि
वदित्यनुमानाच्च॥ एवमहंत्वा स्यापिकरणतादात्म्येनैवमनसा ग्रहणं॥ सुषुप्तौ मनोलयेतदग्रहणं का
ति लोपाधीनां कालत्ववदिदिक॥ अथ कथं जीवस्य ब्राह्मभाव इत्यपेक्षायामाह॥ ॥अनन्यभक्त्यात बुद्धि

शां॰जि॰ लपादत्यन्तं ॥११॥ पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया । यस्यान्तःस्थानि भूतानि येन सर्वमिदं तत
३५ मिति श्रुतं । तथा । भक्त्यैकलभ्ये पुरुषे पुराणे मुक्तौ किमर्थं क्रियते न यत्न इति ॥ तस्मात्परभक्तिमा
त्रेण बुद्धेरत्यन्तलये सति ब्रह्मानंदावाप्तिलक्षणा मुक्तिरित्यर्थः ॥ तथा च तदीयबुद्धिविलय
प्रागभावासहत्वत्ति ब्रह्मानन्दावाप्तिर्मुक्तिरिति तल्लक्षणं सूचितं ॥ अथ ब्रह्मानन्दावाप्तिः सिद्ध
त्वेनापुरुषार्थत्वमिति चेन्न ॥ ग्रामादिवद्विशिष्टतया पुमर्थत्वात् ॥ अत्र बुद्धिजीवोपाधिधर्मतः ॥
भगवत एव बुद्धितत्वाभ्युपगमात् ॥ अन्यथेदं सुखमत्र सुखमत्र सुखत्वमिति ज्ञानाज्ज्ञाते नित्य
तयात द्विशिष्टस्य पुमर्थत्वाभावप्रसङ्गात् ॥ इहाकृत्यो विकल्पाभावात् ॥ तस्मादसिद्धोपरागेन
सिद्धेपीच्छाकृता इति कृत्यसाध्यत्वज्ञानं प्रतिबंधकमिति चेत् ॥ रूपेणोद्देशबलवदनिष्टानुबंधि राम॰
त्वतिरोधानादिवोत्कटरागेण कृत्यसाध्यत्वमपि तिरोधाय प्रवर्त्तितव्यमिति ॥ किमनुपपन्नं ॥ ३५
आनंदं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमित्यागमादपि तथात्वमध्यवसेयमिति ॥ अथ परभक्ति

सिद्धोजीवानां दृष्टभोगवदितरेषामप्यपवर्गाणामपि भोगेनैव लयश्च नि मोक्ष एवस्यादित्यत उच्यते॥ ॥
आयुष्श्विरमितरेषां तु हानिरनास्पदत्वात्॥१३॥ आत्मरतेोसत्यां तस्य तावदेव चिरं यावन्न विमोक्षोऽथ
संपत्स्य इति श्रुतिस्तथा॥ धर्मार्थिकामैः किं तस्य मुक्तिस्तस्य करे स्थिता॥ समस्तजगतां मूले यस्य भक्ति
स्थिरात्वयि। तथाचायुर्जीवानां दृष्टं तन्मात्रमेव परभक्तो समाप्यमपि मुक्ति प्रतिबंधकं॥ तावदेव जीव
न्मुक्तिः॥ इतरेषां तु धर्माधर्मानां जीवानां दृष्टलक्ष्य लये सति बुद्धेरत्यन्तलये समास्य लाभावा द्बुद्धि
भोगाभाव एवेति नानिर्मोक्ष इति॥ बुद्धेरपि विकार्यत्वेन कारणत्वात्॥ नाप्येतद् दृष्टा हेतुत्वं। कारणान्तरा
भावे फला निष्फलावपि हेतुत्वाक्षतेः॥ तस्य भगवतोषरोषादि रूपस्यापि लयः कालात्प्रलय साम
ग्रीवा॥ यथाङ्गा प्रर्वाणामङ्कुवैगुण्यादजनित परमापूर्वाणां लय इति॥ ब्रह्मार्पणं तु प्रतिबंधकी
भूतकर्मणामवंध्यायेति सर्वमनवद्यं परं परये वज्ञानाभिनाकर्मक्षइति॥ संसृतिरेषाममक्तेः स्या ५
न्माज्ञानात्कारणासिद्धेः॥ अथ जीवस्य संसारः किमज्ञानकृतोमतः॥ उताभक्ति कृतस्तत्र सत्रमे
१२

तत्प्रवर्त्तते॥ स्वर्गोपि जीवन्मुक्तत्वं मुक्तिरेषा त्रयी गतिः॥ जीवन्मुक्तिः परा भक्तिस्तदसिद्धिस्तु
संसृतिः॥ सापि भक्तेः कामनानामभावादेव तिष्ठति॥ ॥ भक्तौ सत्यां निवर्त्तेत तथा चोक्तं महर्षि
भिः॥ तावदार्त्तिस्तथा वांछा तावन्मोहस्तथा सुखं॥ यावन्नायाति शरणं त्वामशेषाघनाशनं॥
ननु च ज्ञानकृतास्तृष्टि ज्ञानात्तद्धानिरिष्यते॥ रज्जौ सर्पादिहेतूनामभावात्तदसंभवात्। जन्मा
दिघोरयमकिंकरताडितानि दैन्यानि तान्ततपनात्मजदर्शनानि॥ जन्तोरहंममतरंगकु
रङ्गत्वम्नाकृत्स्नांघ्रिपंकजपराङ्मुखतानुभावः॥ ॥ त्रीण्येषां नेत्राणि शब्दलिङ्गाक्षभेदा
द्रुद्रवत्॥ एषां जीवानां त्रीणि नयनसाधनानि॥ अर्थप्राप्तिनौ प्रमाणानीतियावत्॥ प्र
मितित्वाविशेषेपि कारणत्रैविध्यात्त्रैविध्यं। तानि यथा ज्ञायमानयोग्यपदार्थरूपः शा
ब्दः शाब्दप्रमाकरणं॥ तस्य प्रथममभिधानमलौकिकभक्तेस्तत्साधनतादौ प्राधान्यकथना
र्थं॥ तथा ईर्यमानव्याप्यपक्षधर्मलिंगिज्ञानकरणमस्माकं सत्कार्यत्वाज्ज्ञायमानत्वमप्यविरु

त्वं॥ प्रत्यक्षप्रमितित्वे करणान्यक्षाणि विषयसम्बन्धीनि॥ तानि च मनःश्रोत्रत्वक्चक्षूरसनाघ्राणा
निषट्॥ स्वसम्बन्धेनान्तःकरणस्य तमोऽभिभूय चिदात्मप्रकाशमानामर्थाकारां सत्त्ववृत्तिं ज
नयन्ति॥ अत एवोक्तं॥ सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते इति॥ जीवबुद्धिरूपमनसो विका
राश्चक्षुरादयः॥ सन्तीत्यात्मप्रकाशेन प्रकाश्यन्त इति॥ तत्र सत्त्ववृत्त्यपवकल्पनं गौरवान्॥ एतद्दे
वसाक्षिभास्यत्वं॥ एवं शाब्दानुमानप्रत्यक्षभेदाः स्त्रीण्येव॥ यथा रुद्रस्य त्रीणि चक्षूंरधिष्ठानानि
२. नाधिकानि स्थानानि तद्वत्॥ चन्द्रसूर्याग्निरूपत्वात् चिन्हानि उपमानं तु शक्तिग्रहमात्रार्थं॥
तच्च सामान्यतो दृष्टानुमानसहकारेण प्रसिद्धपदसामानाधिकरण्यात्कविकाव्यार्थपरिच्छेदव
न्मनसापि सम्भवतीति त्रिष्वेवान्तर्भूतमिति न पृथक्॥ प्रमाणविचारोऽस्माभिर्न्यायतत्त्वनिक
षे वेदान्ततत्त्वनिकषे च निरूपित इति नेह प्रतन्यते॥ जीवबुद्धिर्मनो नाम तत्त्वं संकोचयोगवि
काशवत्। योगपद्या योगपद्ये धिया नेनोपपद्यते॥ ईश्वराहंकृते जीवबुद्धीनामुद्भवो यतः॥ बुद्धे

दुःखादिवत्साक्षादहं त्वमपि गृह्यते॥मात्राभूतेन्द्रियादीनां भगवद्बुद्धिजन्मतः॥भगवद्बुद्धि
वद्धित्वाच्चिदाग्राह्यं तथेन्द्रियैः॥ भूतानि पंच तन्मात्राः पंच चैकादशेन्द्रियं॥अहं बुद्धिः प्रधा
नं च परे शास्त्रत्वसंग्रहः॥ इति षड्विंशतितत्वानि॥ ।आविस्तिरोभावविकाराः स्युः क्रियाफल
संयोगात्॥९६॥प्रसङ्गादुत्पत्तिलयौ चिन्त्यते॥तत्रोत्पत्तिराविर्भावलक्षणा सत एव क्रियो
योग्यता॥ तथा तिरोभावस्तदयोग्यता॥एवं वृद्धिहानादयो विकारा—एव भवन्ति॥कुतः करो
ति घटं नाशयति घटमित्यादौ धात्वर्थफलसम्बंधव्यपदेशात्॥तेच सन्त एव घटन्ते नास
न्तः॥तथा चोक्तं॥नासतो विद्यते भावो नाभावो विद्यते सत इति॥एवं भवति नश्यतीत्यादाव
पि क्रियाश्रयत्वं प्रतीयते॥तत्तु सत एव सम्भवति न चाद्यक्षणसम्बन्धो नाशप्रतियोगित्वं
वा तदर्थः॥आद्यत्वस्यानिरुक्तेः॥न चाविर्भावस्याविर्भावान्तरावश्यकत्वेऽनवस्थागौर

37

शां० ३८ वयोरन्यतरप्रसङ्गः॥ घटसामग्र्या एवाभावादस्याविर्भावत्वात्॥ एवंचघटस्यएवैद्वावीविर्भावति
रोभावपरंपरैव प्रागभावः॥ तिरोभाव एव नाशः। स च क्वचिदात्यन्तिकोऽपि। यथा देवदत्तशरीरस्य॥ ल
38 यथा वा मुक्तबुध्यादीनामन्योन्यात्यन्ताभावौ च परस्परविरुद्धधर्मतदधिकरणयोर्नातिरिच्य
ते॥ अन्यथाभावोऽप्यभावान्तरस्वीकारप्रसङ्गादिति॥ प्रलये तु प्रलयाख्यविकारातिरिक्तस्य
विकारस्याभावात्॥ संस्कारास्तु सूक्ष्मात्मना तिष्ठन्तीति न कोऽपि दोषः॥ ॥ इति श्रीस्व
प्नेश्वराचार्यविरचिते शातसूत्रीयभाष्ये तृतीयाध्यायस्य द्वितीयमाह्निकं॥ ॥ इति लक्षणा
भक्तिमीमांसा समाप्ता॥ ॥ श्रीः॥ ॥ शुभं भवतु॥ ॥ हरिवासुदेवाय नमः॥ श्रीविश्वेशः॥ राम० ३८

पा० १००